# बहुव्रीहिसमास-तद्भेदप्रभेदविमर्शः


## हरिलालपौडेलः

*उपप्राध्यापकः, नेपालसंस्कृतविश्वविद्यालयः, विश्वविद्यालयविद्यापीठम्*

hlpsharma2035@gmail.com

Orcid : https://orcid.org/0009-0003-0302-1931


https://doi.org/10.3126/anveshana.v4i1.96927


**सारः**

*अनुसन्धानात्मकलेखोऽयं बहुव्रीहिसमासपरिचय-तद्भेदप्रभेदविषयकविश्लेषणे केन्द्रितोऽस्ति। बहुव्रीहिसमासपरिचयपूर्वकं तद्भेदप्रभेदनिर्धारणोद्देश्येनायं शोधलेखो निर्मितः। लेखश्चायं गुणात्मकस्वरूपे संरचितः। अत्र व्याकरणग्रन्थादिभ्यो बहुव्रीहिसमाससम्बद्धास्तद्भेदप्रभेदसम्बद्धाश्च तथ्यरूपाः सामग्रीः सङ्कलय्य तासां वर्णनं, विश्लेषणञ्च कृत्वा निष्कर्षः स्थापितोऽस्ति। अतोऽस्मिन् मूलतो वर्णनात्मको विश्लेषणात्मकश्चाध्ययनविधिरवलम्बितोऽस्ति। अत्र च मूलतः पाणिनीयव्याकरणस्य बहुव्रीहिसमाससम्बद्धसिद्धान्तः सैद्धान्तिकपर्याधारत्वेन गृहीतोऽस्ति। समासभेदेष्वन्यतमो बहुव्रीहिः। तत्र 'शेषो बहुव्रीहि'रित्यधिकारस्थसूत्रैर्विहितः समासो बहुव्रीहिः। बहुव्रीहिसमासस्य साधारणः/सामान्यो बहुव्रीहिः, विशेषबहुव्रीहिः, ज्ञापकसिद्धो व्यधिकरणबहुव्रीहिश्चेति मुख्यतः त्रयो भेदाः दृश्यन्ते। साधारणः सामान्यो वा- द्वितीयार्थ-तृतीयार्थादिः षड्विधः। विशेषबहुव्रीहिश्च- अव्ययपूर्वपदोपमान-संघात-विकार-प्रादि-नञ्-संख्योत्तरपद-संख्योभयपद-दिगन्तराल-कर्मव्यतिहार-सहार्थबहुव्रीहिश्चेत्येकादशधा। ज्ञापकसिद्धस्य व्यधिकरणबहुव्रीहेश्च सप्तम्यन्तपूर्वपदः, सप्तम्यन्तोत्तरपदः, पञ्चम्यन्तपूर्वपदश्चेति त्रयः प्रभेदाः प्रचलिताः दृश्यन्ते। तद्विकल्परूपेण च साधारणो विशेषश्चेति बहुव्रीहेर्द्विधात्वं स्वीकृत्य व्यधिकरणं तत्प्रभेदेष्वन्तर्भावयितुं शक्यते। वर्तिपदार्थान्वयाधारेण बहुव्रीहेः तद्गुणसंविज्ञानोऽतद्गुणसंविज्ञानश्चेति द्वौ भेदौ, पदसंख्याधारेण च द्विपदो बहुपदश्चेति तस्य द्वौ भेदौ स्वीक्रियेत इति निष्कर्षोऽत्र प्राप्तोऽस्ति।*


**शब्दकुञ्जी :** अन्यपदार्थप्रधानः, तद्गुणसंविज्ञानाऽतद्गुणसंविज्ञानौ, अनेकमन्यपदार्थे, समानाधिकरणः, व्यधिकरणः।

## विषयपरिचयः

व्याकरणशास्त्रे हि शब्दसाधुत्वान्वाख्यानाय कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपाणीति पञ्च वृत्तय आश्रीयन्ते। तत्रैका समासवृत्तिः। समासो नाम समर्थपदयोः तथाविधपदानां वा सार्थकरूपेणैकपदीकरणम्। अल्पशब्दैर्बहुगम्भीरभावप्रकाशनाय परिष्कृतभाषाप्रयोगाय च समासस्य प्रयोगो भवति। समासः खलु संस्कृतवाङ्मयस्य महत्त्वपूर्णवैशिष्ट्यरूपेण ज्ञायते। समासप्रक्रियाज्ञानं विना संस्कृतभाषायां प्रयुज्यमानानां समस्तपदानामर्थबोधो न सम्भवति। अत एव समासज्ञानमावश्यकं भवति। तत्र 'समर्थः पदविधिः' (अष्टा. २।१।१) इति परिभाषामाश्रित्य 'प्राक्

कडारात् समासः' (अष्टा. २।१।३) इत्यधिकारे एकाधिकानां समर्थानां पदानां सार्थकरूपेण संयोजनं कृत्वा नूतनशब्दनिर्मापणं समासः। पाणिनिः 'प्राक्कडारात् समासः' (अष्टा. २।१।३) इत्यत आरभ्य 'कडाराः कर्मधारये' (अष्टा. २।२।२८) इति सूत्रपर्यन्तमष्टोत्तरशतसूत्रैः समासप्रक्रियायाः वैज्ञानिकीं व्यवस्थां कृतवानस्ति। समासभेदाश्चानेके दृश्यन्ते। समासभेदेष्वन्यतमो बहुव्रीहिः। बहुव्रीहिपरिचयक्रमे च 'अव्ययं विभक्ति०' (अष्टा. २।१।६) इति सूत्रे भाष्यकारेण 'अन्यपदार्थप्रधानो बहुव्रीहिः' (पतञ्जलिः, २०२०, ५७०) इत्युक्तम्, किन्तु 'उन्मत्ता गंगा यस्मिन् तद् उन्मत्तगङ्गम् (देशः)' इत्यादावव्ययीभावेऽपि तल्लक्षणं घटते। एवमेव- मयूरव्यंसकादि-कर्मधारयसमासोदाहरणेषु 'जहि जोडं जहि जोडमित्याभीक्ष्ण्येन य आह स जहिजोडः' इत्यादिष्वप्यन्यपदार्थप्रधानत्वं दृश्यते। अतो बहुव्रीहिसमासस्य निर्दुष्टपरिचयः कः ? इत्येषा समस्याऽऽपद्यते । बहुव्रीहिसमासं सम्यक्तया ज्ञातुञ्च तद्भेदप्रभेदा अपि ज्ञेयाः। अत एव बहुव्रीहिसमासस्य भेदाः प्रभेदाश्च कति सन्तीत्येषा समस्यापि समुपतिष्ठते। एतयोः समस्ययोः समाधानाय च विशिष्टस्यानुसन्धानस्यावश्यकताऽस्ति। बहुव्रीहिसमासस्य दोषरहितपरिचयप्रदानम्, बहुव्रीहिसमासस्य प्रभेदानां निर्धारणञ्चास्य लेखस्योद्देश्यमस्ति। उल्लिखितसमस्यानां समाधानाय निम्नाङ्कितान् प्राविधिकशोधप्रश्नान् समाश्रित्य शोधलेखोऽयं प्रवर्तते।

**शोधप्रश्नाः**

प्रकृतलेखो निम्नाङ्कितेषु शोधप्रश्नेषु केन्द्रितो वर्तते-

क) बहुव्रीहिसमासस्य परिचयः कः ?

ख) बहुव्रीहिसमासस्य भेदाः प्रभेदाश्च कति सन्ति ?

ग) बहुव्रीहिसमासपरिचयस्य तद्भेदप्रभेदानाञ्च मूल्यं किम् ?

**शोधोद्देश्यानि**

प्रकृतलेखे मूलतो निम्नाङ्कित-शोधोद्देश्यप्राप्तौ प्रयत्नः कृतोऽस्ति-

क) बहुव्रीहिसमासस्य परिचयप्रदानम्।

ख) बहुव्रीहिसमास-भेदप्रभेदनिर्धारणम्।

ग) बहुव्रीहिसमासपरिचयस्य तद्भेदप्रभेदानाञ्च मूल्यनिर्धारणम्।

## पूर्वकार्याणां समीक्षा

बहुव्रीहिसमासविषये तद्भेदप्रभेदविषये च कैः कैराचार्यैरनुसन्धातृभिश्च किं किमध्ययनं विश्लेषणञ्च कृतं किं किञ्चोक्तमित्युल्लिख्य समीक्ष्यतेऽत्र-

स्वकीये 'अष्टाध्यायी' इति ग्रन्थे पाणिनिः 'प्राक्कडारात् समासः' (अष्टा. २।१।३) इत्यत आरभ्य 'कडाराः कर्मधारये' (अष्टा. २।२।२८) इति सूत्रपर्यन्तमष्टोत्तरशतसूत्रैः समासप्रक्रियाया वैज्ञानिकीं व्यवस्थां कृतवानस्ति। तत्र तेन 'शेषो बहुव्रीहिः' (अष्टा. २।२।२३) इति सूत्रस्याधिकारे 'अनेकमन्यपदार्थे' (अष्टा. २।२।२४) इत्यादिभिः सूत्रैर्बहुव्रीहिसमासव्यवस्था कृता दृश्यते।

वैयाकरणसिद्धान्तकौमुद्यां बहुव्रीहिसमासप्रकरणे द्विसप्ततिसंख्यकसूत्राणि, कानिचन वार्त्तिकानि चोपस्थाप्य बहुव्रीहिसमासप्रक्रिया निरूपिता (दीक्षितः, २००८, पृ. ८७-९४), यस्मिन् प्रकरणे प्रथमं समानाधिकरणानामेव बहुव्रीहिरित्युक्तम् ( पृ. ८७), 'सप्तमीविशेषणे बहुव्रीहौ' इति सूत्रे तु "अत एव ज्ञापकाद् व्यधिकरणपदो बहुव्रीहिः" ( पृ. ९४) इत्युक्तम्। समासश्चायं केन सूत्रेण भवतीति विषये तु किमपि नोक्तम्। बहुव्रीहिप्रभेदविषयेऽपि दीक्षितस्य स्पष्टमतं न दृश्यते।

प्रतिसंस्कृतायां सिद्धान्तकौमुद्यां समासप्रकरणे सर्वेषां समासभेदानां परिचयः प्रदत्तः, वर्गीकरणञ्च कृतम्, किन्तु बहुव्रीहिप्रभेदानां केषाञ्चिदेव नामोल्लेखः कृतः। तत्र बहुव्रीहेः- संख्याबहुव्रीहिः, दिगन्तरालबहुव्रीहिः, व्यतिहारबहुव्रीहिः, सहार्थबहुव्रीहिश्चेति चत्वारो भेदाः प्रदर्शिताः (सिग्देलः, २०१५, पृ. २२८-२३३)। भेदप्रदर्शनन्तदपूर्णं दृश्यते।

'समासवृत्तिविमर्शः' इति शोधग्रन्थे तद्गुणसंविज्ञानबहुव्रीहिः, अतद्गुणसंविज्ञानबहुव्रीहिः, संख्योत्तरपदबहुव्रीहिः, अन्तरालाभिधेयकबहुव्रीहिः, सरूपोपलक्षितबहुव्रीहिः, सहपूर्वपदबहुव्रीहिश्चेति बहुव्रीहेः षड् भेदाः स्वीकृताः। तत्रैव- समानाधिकरण-व्यधिकरणभेदाभ्यामस्य द्विधात्वमप्युक्तम् (त्रिपाठी, २०४७, पृ. ११९-१२०)।

'समासः' इति ग्रन्थे बहुव्रीहिसमासस्य सामान्य-विशेषभेदेन द्वैविध्यमुक्त्वा सामान्यबहुव्रीहेः- द्वितीयार्थ-तृतीयार्थादिभेदेन षोढात्वम्, विशेषबहुव्रीहेश्च- व्यधिकरणः, संख्योत्तरपद इत्यादिभेदेन नवधात्वमुक्तम् (भट्टः, २००६, पृ. ११)।

भट्टि-काव्यस्य व्याकरण-सन्दर्भ एकम् आलोचनात्मकम् एवम् भाषिकम् अध्ययनम् (भट्टि-काव्य का व्याकरण के संदर्भ मे एक आलोचनात्मक एवं भाषिक-अध्ययन) इति शीर्षकस्य हिन्दीभाषानिबद्धस्य विद्यावारिधिशोधप्रबन्धस्य चतुर्थेऽध्याये भट्टिकाव्यप्रयुक्तसमस्तपदानां विश्लेषणक्रमे बहुव्रीहिसमासस्यापि परिचयः प्रदत्तोऽस्ति, यत्र बहुव्रीहेः समानाधिकरण-व्यधिकरणभेदाभ्यां द्विधात्वमुक्तम् (शर्मा, १९८८, पृ. ८९-९२)।

'संस्कृत-समासानाम् ऐतिहासिकम् एवं भाषा-वैज्ञानिकम् अध्ययनम्' (संस्कृत समासों का ऐतिहासिक एवं भाषा-वैज्ञानिक अध्ययन) इति शीर्षके हिन्दीभाषानिबद्धे विद्यावारिधिशोधप्रबन्धे 'बहुव्रीहिसमासेऽवयवानां सम्बन्धः' (बहुव्रीहि समास मे अवयवों का सम्बन्ध) इत्युपशीर्षके- विभक्त्यर्थे, अर्थाधिक्यार्थे, निषेधात्मकेऽर्थे, अव्ययार्थे, उपमानोपमेयसम्बन्धार्थे, व्यतिहारार्थे च बहुव्रीहिसमासो भवतीति वर्णितम् ( देवी, १९९३, पृ. ६२ - ६५ )।

'व्याकरणदृष्ट्या हरिकेलिमहाकाव्यस्य समीक्षणम्' इत्यस्मिन् विद्यावारिधिशोधप्रबन्धे द्विपदबहुव्रीहिः, बहुपदबहुब्रीहिः, नञ्पूर्वपदबहुब्रीहिरित्यादिरीत्या बहुव्रीहेर्दशधात्वं स्वीकृतम् (पौडेलः, २०६४, पृ. १७०)। हरिकेलिमहाकाव्यगतसमस्तपदसमीक्षणक्रमे च तत्र समानाधिकरणबहुब्रीहेः पृथक् सोदाहरणचर्चां कृत्वा बहुब्रीहिसमासस्यैकादश प्रकारा इत्युक्तम् (पृ. १८६)।

'शब्दकौस्तुभे समासप्रकरणम्-समीक्षात्मकमध्ययनम्' इत्यस्मिन् विद्यावारिधिशोध-प्रबन्धे बहुव्रीहिः समानाधिकरणो विशेषश्चेति द्विधा विभक्तः। तत्र समानाधिकरणः (सामान्यः) षड्धा, विशेषश्च नवधा विभक्तः (रेथी, २००९, पृ. ३०-३२)।

'पाणिनीय-व्याकरणान्तर्गतानां सन्धीनां समासानाञ्च समीक्षात्मकमनुशीलनम्' (पाणिनीय व्याकरणान्तर्गत सन्धि एवं समासों का समीक्षात्मक अनुशीलन) इति शीर्षके हिन्दीभाषानिबद्धे विद्यावारिधिशोधप्रबन्धे बहुव्रीहिसमासस्य प्रथमं समानाधिकरणो व्यधिकरणश्चेति द्वौ प्रमुखभेदौ प्रदर्श्य समानाधिकरणस्य द्वितीया-तृतीया-चतुर्थी-पञ्चमी-षष्ठी-सप्तमीसमानाधिकरणेति षड् भेदाः प्रदर्शिताः, अन्ये भेदास्तु न चर्चिताः। व्यधिकरणबहुवीहेरुदाहरणानि प्रदत्तानि किन्तु केन सः समासो विधीयत इति नोल्लिखितम् (भट्टः, २०१३, पृ २४५-२४८)।

'सन्धि-समास-कारकाणां परिचयः' इत्यस्यामन्तर्जालकपुस्तिकायां बहुव्रीहिसमासः षोडशधा विभक्तो दृश्यते (मुक्तस्वाध्यायपीठम्, २०१९, पृ. ३४ )।

'पदार्थप्रधानसमासलक्षणस्य प्रयोगौचित्यविमर्शः' इति शीर्षके लघ्वनुसन्धानशोधप्रबन्धे बहुव्रीहिसमासलक्षणे नूतनां दृष्टिं प्रस्तुवन् भट्टराईः (२०८०) 'विशेषणीकरणं बहुवीहिरि'ति लक्षणमुक्त्वा बहुव्रीहिसमासं प्रथमतः समानाधिकरणो व्यधिकरणश्चेति द्विधा विभज्य ततः प्रादि-नञ्-दिगन्तराल-कर्मव्यतिहार-सहपूर्वपद-संख्याप्रधानश्चेति षड्धा विभजते (पृ. ७९)।

केचिद् बहुव्रीहिं बहुपद-सङ्ख्योत्तरपदोभयपद-सहपूर्वपद-व्यतिहारलक्षण-दिगन्तराललक्षणभेदात् सप्तधा (रेग्मी, २०८२, पृ. १०५) वर्गीकुर्वन्ति। तत्र द्विपदत्वं बहुपदत्वञ्च सङ्ख्योत्तरपदादावन्यप्रभेदेष्वपि घटत इति तयोर्विशिष्टप्रकारेषु गणनमनुचितम्। किञ्च तद्वर्गीकरणकमपर्याप्तं दृश्यते, अव्ययपूर्वपदादीनां बहूनां प्रभेदानामनुल्लेखात्।

पूर्वचर्चितैराचार्यैरनुसन्धातृभिश्च बहुव्रीहिसमासविषये प्रदत्तैर्विवरणैस्तस्य परिचयो न सुस्थिरीकृतो दृष्टः, तत्प्रकारविषये तु मतभेदबाहुल्याज्जनेषु भ्रम एव जागर्तीति समस्यामिमां समाधातुं विशिष्टाध्ययनमावश्यकं दृश्यते, किन्तु विषयपरिचये समुत्थापितानां समस्यानां शोधप्रश्नानाञ्च परिपूर्णं, तर्कयुक्तं, शास्त्रानुकूलञ्च समाधानान्वेषणं पूर्वकार्येषु न प्राप्यते। इममेव शोधान्तरालं (शोधरिक्ततां) परिपूरयितुं बहुव्रीहिसमास-तद्भेदप्रभेदविषयकविश्लेषणे केन्द्रीभूय लेखोऽयं निर्मितः।

## अनुसन्धानविधिः

अनुसन्धानमिदं मूलतः वर्णनात्मकं, विश्लेषणात्मकञ्च विधिमाधृत्य कृतम्। अस्मिन्ननुसन्धानेऽवलम्बितोऽध्ययनविधिर्यथा–

### अनुसन्धानस्वरूपम्

अत्रानुसन्धाने हि बहुव्रीहिसमासविषये तत्प्रकारविषये च व्याकरणग्रन्थेभ्यः तत्सम्बद्धशोधप्रबन्धेभ्यः शोधलेखादिभ्यश्च तथ्यरूपाः सामग्रीः सङ्कलय्य तासां वर्णनं, विश्लेषणञ्च कृत्वा शब्दात्मको निष्कर्षः स्थापितोऽस्ति। अत एवेदं गुणात्मकमनुसन्धानमस्ति।

### अनुसन्धानस्य क्षेत्रं परिसीमा च

अस्मिन् शोधलेखे मूलतो बहुव्रीहिसमासप्रकारविषयकं सपरिचयं विश्लेषणं क्रियते। अत एवास्यानुसन्धानस्य क्षेत्रं संस्कृतव्याकरणस्य समासप्रकरणं विद्यते। समासप्रकरणसहिता व्याकरणग्रन्थाः,

सम्बद्धशोधप्रबन्धशोधलेखादयश्चास्याध्ययनविषयाः सन्ति। समासप्रकरणस्य समग्राध्ययनञ्चैकस्मिन् लघुशोधलेखे न सम्भवतीति बहुव्रीहिसमासविषयकाध्ययने तत्रापि तत्प्रकारविषयकविश्लेषणे लेखोऽयं केन्द्रितोऽस्ति। अतो बहुव्रीहिपरिचयपूर्वकतत्प्रकारविश्लेषणमेवास्य शोधलेखस्य परिसीमास्ति।

**तथ्यसङ्कलनं तत्साधनानि च**

अत्र व्याकरणग्रन्थादिभ्यो बहुव्रीहिसमासतत्प्रकारविषयकतथ्यानां सङ्कलनं कृतम्। तत्र पाणिनीयव्याकरणग्रन्थाः तथ्यानां प्राथमिकस्रोतोरूपेण, समाससम्बद्धशोधप्रबन्धशोधलेखादयश्च द्वितीयकस्रोतोरूपेण गृहीताः। अत्र प्रकाशितसामग्रीणां वैद्युतमाध्यमप्राप्ततथ्यानाञ्च समीक्षात्मकं विश्लेषणं कृत्वा निष्कर्षप्रतिपादनाय प्रयत्नः कृतोऽस्ति।

**तथ्यविश्लेषणप्रक्रिया**

अत्र विविधस्रोतोभ्यः सङ्कलितानां तथ्यानां मूलतो वर्णनात्मकं समीक्षात्मकञ्चाध्ययनं कृतम्। विविधस्रोतोभ्यः प्राप्तानां तथ्यानां समाससम्बद्धपाणिनीयव्याकरणव्यवस्थामाधृत्य विश्लेषणं कृत्वा निष्कर्षणं कृतम्। सन्दर्भाङ्कने सन्दर्भसामग्रीसूचीनां समुल्लेखने चात्र यथासम्भवं लेखकमितिपद्धतिः, (APA 7th ed.) प्रयुज्यते। संस्कृतभाषासम्बद्धानां श्लोकसूत्रादीनां समुद्धरणे कतिपयेषु स्थानेषु तु लेखकमितिपद्धतिर्नोपयुज्यत इति संस्कृतस्य परम्परिता पद्धतिरपि प्रयुक्तास्ति। अत एवात्र एपिएशैलीसन्निकटा परम्परितशैली प्रयुक्तास्ति।

## अनुसन्धानस्य सैद्धान्तिकपर्याधारः

पाणिनीयव्याकरणस्य बहुव्रीहिसमाससिद्धान्त एवास्य शोधकार्यस्य सैद्धान्तिकपर्याधारोऽस्ति। पाणिनिः 'शेषो बहुव्रीहिः' (अष्टा. २।२।२३) इति सूत्रमारभ्य 'तेन सहेति तुल्ययोगे' (अष्टा. २।२।२८) इत्यन्तैः षड्भिः सूत्रैर्बहुव्रीहिसमासव्यवस्थां कृतवान्। तत्र कात्यायनेन कानिचन वार्त्तिकानि योजितानि। तान्येवात्र सैद्धान्तिकपर्याधाररूपेणोपस्थाप्यन्ते-

**शेषो बहुव्रीहिः (अष्टा. २।२।२३)**

बहुव्रीहिसमासप्रकरणस्याधिकारसूत्रमिदम्। एतत्सूत्राधिकारे विधीयमानः समासो बहुव्रीहिरित्युच्यते। सूत्रार्थश्च- शेषः समासो बहुव्रीहिसंज्ञो भवति। कश्च शेषः ? यत्रान्यः समासो नोक्तः (शास्त्री, शुक्लश्च, १९६५, पृ. १२६-१२७) इति। येषां पदानां यस्मिन्नर्थेऽव्ययीभावादिसंज्ञकः समासो न विहितः स शेष इति सूत्रेऽस्मिन् तत्त्वबोधिनी टीका (ashtadhyayi.com, 2023) । सप्तसु सुपां त्रिकेषु यस्य त्रिकस्य शृङ्गग्राहिकया समासो नोक्तः, यथा - प्रथमायाः, स शेष इत्यर्थस्तु न, कण्ठेकाल इत्यादावप्रथमान्तानामपि समासस्येष्टत्वात् (शास्त्री, शुक्लश्च, १९६५, पृ. १२७) इति पदमञ्जरी।

**'अनेकमन्यपदार्थे' (अष्टा. २।२।२४)**

अनेकं सुबन्तमन्यपदार्थे वर्तमानं सह समस्यते, बहुव्रीहिश्च समासो भवतीति (शास्त्री, शुक्लश्च, १९६५, पृ. १२७-१२८) सूत्राक्षरार्थः। कौमुद्याम्- व्यधिकरणानां न बहुव्रीहिरिति प्रतिपादितम् (दीक्षितः,२००८,पृ. ८७)। प्राप्तोदको ग्रामः, ऊढरथोऽनड्वान् इत्यादीन्युदाहरणानि। उच्चैर्मुखः, कण्ठेकालः, केशचूड इत्यादिषु साधुप्रयोगेषु

सूत्रेणानेन समासो न प्राप्यत इति सूत्रेऽस्मिन् काशिकायां कौमुद्याञ्च कानिचन वार्त्तिकानि पठितानि। तान्यत्र कौमुद्यनुसारेण सोदाहरणं प्रस्तूयन्ते-

**१) अव्ययानां च (पाण्डेयः, १९९७, पृ. २१२)**

अव्ययानामपि कुत्रचिद् बहुव्रीहिसमासो भवतीति वार्त्तिकार्थः। उच्चैर्मुखः नीचैर्मुख इत्यादीन्युदाहरणानि। उच्चैरित्यादीनामधिकरणशक्तिप्रधानतया सप्तम्यन्तत्वेन प्रथमान्तत्वाऽभावेन सामानाधिकरण्याभावादप्राप्ते वचनमिति बालमनोरमा (पाण्डेयः, १९९७, पृ. २१२ )।

**२) सप्तम्युपमानपूर्वपदस्योत्तरपदलोपश्च (पाण्डेयः, १९९७, पृ. २१२)**

सप्तम्यन्तपूर्वपदस्योपमानपूर्वपदस्य च समस्तपदस्य पदान्तरेण बहुव्रीहिसमासो भवति, समस्तपदात्मके पूर्वपदे यदुत्तरपदं तस्य लोपश्च भवतीति वार्त्तिकार्थः। तत्र सप्तम्यन्तपूर्वपदसहितसमस्तपूर्वपदकबहुव्रीहिः- कण्ठेस्थः कालोऽस्य सः= कण्ठेकालः। उरसि लोमानि यस्य सः = उरसिलोमा। उपमानसहितसमस्तपूर्वपदकबहुव्रीहिः- उष्ट्रमुखमिव मुखं यस्य सः = उष्ट्रमुखः। खरमुखमिव मुखं यस्य सः = खरमुखः।

**३) सङ्घातविकारषष्ठ्याश्चोत्तरपदलोपश्च (पाण्डेयः, १९९७, पृ. २१३)**

सङ्घातपदान्तस्य विकारपदान्तस्य च षष्ठ्यन्तपदस्य समर्थेन पदान्तरेण बहुव्रीहिसमासो भवति, षष्ठ्यन्तादुत्तरपदस्य लोपश्चेति वार्त्तिकार्थः। केशानां सङ्घातः = केशसंघातश्चूडा यस्य सः = केशचूडः। सुवर्णस्य विकारोऽलंकारो यस्य सः = सुवर्णालंकारः।

**४) प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपः (पाण्डेयः, १९९७, पृ. २१२)**

प्रादिभ्यः परं यद्धातुजप्रकृतिकप्रथमान्तं तस्यान्येन प्रथमान्तेन बहुव्रीहिसमासो भवति, तत्र प्रादिभ्यः परस्योत्तरपदस्य धातुजस्य लोपश्च विकल्पेन भवतीति वार्त्तिकार्थः। प्रपर्णः/प्रपतितपर्ण इत्याद्युदाहरणानि। प्रपतितं पर्णं यस्मादिति विग्रहेऽनेन बहुव्रीहिसमासः, प्रपतितेति पूर्वपदे धातुजस्योत्तरपदस्य लोपश्च।

**५) नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः (पाण्डेयः, १९९७, पृ. २१२)**

नञः परेषामस्त्यर्थवाचिनां सुबन्तानां बहुव्रीहिर्वाच्यः, अस्त्यर्थवाचिनामुत्तरपदभूतानां लोपश्च वा वक्तव्य इत्यर्थः। न विद्यमानः = अविद्यमानः। अविद्यमानः पुत्रो यस्येति विग्रहेऽनेन बहुव्रीहिसमासः अस्त्यर्थकविद्यमान-शब्दस्य विकल्पेन लोपश्च। एवम्- अभार्यः/ अविद्यमानभार्य इत्यादि।

**६) अस्तिक्षीरादयश्च (पाण्डेयः, १९९७, पृ. २१३)**

अस्तिक्षीरादयो बहुव्रीहौ पठितव्या इति वार्त्तिकार्थः। अस्ति क्षीरं यस्याः सा = अस्तिक्षीरा गौः। अस्तीत्यस्य तिङन्ततया प्रथमाविभक्त्यन्तत्वाऽभावाद् बहुव्रीहावप्राप्ते वार्त्तिककारेणेदं वचनमारब्धम्, किन्तु अस्तीत्यस्य विभक्तिप्रतिरूपकत्वेन निपातरूपाव्ययत्वात् प्रथमान्तत्वसम्भवाद् वचनमिदं नारब्धव्यमित्यपि कौमुदीकारस्य

बालमनोरमाकारस्य च मतं दृश्यते (पाण्डेयः, १९९७, पृ. २१३-२१५)। भाष्येऽप्युक्तम्- "सुबधिकारेऽस्तिक्षीरादिवचनं, न वाऽव्ययत्वाद्" (पतञ्जलिः, २०२०, पृ. ७१४) इति।

**संख्ययाऽव्ययासन्नादूराधिकसंख्याः संख्येये (अष्टा. २।२।२५)**

संख्येयेऽर्थे या एकादिः संख्या वर्तते, तया सह- अव्ययासन्नादूराधिकसंख्याः समस्यन्ते, बहुव्रीहिश्च समासो भवति। दशानां समीपे ये सन्ति ते उपदशाः, दशानामासन्नाः = आसन्नदशाः, विंशतेरदूराः = अदूरविंशाः, विंशतेरधिकाः = अधिकविंशाः, द्वौ वा त्रयो वा = द्वित्राः, द्विरावृत्ता दश = द्विदशा इत्याद्युदाहरणानि।

**दिङ्नामान्यन्तराले (अष्टा. २।२।२६)**

दिङ्नामानि सुबन्तान्यन्तराले वाच्ये समस्यन्ते, बहुव्रीहिश्च समासो भवति। दक्षिणस्याः पूर्वस्याश्च दिशोर्यदन्तरालम् = दक्षिणपूर्वा दिक्। एवम्- पूर्वोत्तरा, उत्तरपश्चिमा, पश्चिमदक्षिणेत्यादि।

**तत्र तेनेदमिति सरूपे (अष्टा. २।२।२७)**

तत्रेत्यनेन सप्तम्यन्ते, तेनेत्यनेन च तृतीयान्ते पदे विवक्षिते। सप्तम्यन्ते तृतीयान्ते च सरूपे पदे इदमित्येतस्मिन्नर्थे समस्येते, बहुव्रीहिश्च समासो भवतीति सूत्रार्थः। इतिकरणश्चेह विवक्षार्थो लौकिकमर्थमनुसारयति। ततो ग्रहणम्, प्रहरणम्, कर्मव्यतिहारः, युद्धं च समासार्थ इति सर्वमितिकरणाल्लभ्यते (शास्त्री, शुक्लश्च, १९६५, पृ १३६)। कौमुद्यनुसारञ्च- "सप्तम्यन्ते ग्रहणविषये सरूपे पदे, तृतीयान्ते च प्रहरणविषये इदं युद्धं प्रवृत्तमित्यर्थे समस्येते, कर्मव्यतिहारे द्योत्ये, स च बहुव्रीहिः" (दीक्षितः, २००८, पृ. ९०) इति सूत्रार्थः। केशेषु केशेषु गृहीत्वेदं युद्धं प्रवृत्तं केशाकेशि। दण्डैर्दण्डैश्च प्रहृत्येदं युद्धं प्रवृत्तं दण्डादण्डि। मुष्टीमुष्टि इत्यादि।

**तेन सहेति तुल्ययोगे (अष्टा. २।२।२८)**

तुल्ययोगे वर्तमानं सहेत्येतच्छब्दरूपं तृतीयान्तेन सह समस्यते, बहुव्रीहिश्च समासो भवतीति सूत्रार्थः। तुल्ययोगे इत्यस्य युगपत्कालिकक्रियायोगे इत्यर्थः। सह पुत्रेणागतः = सपुत्रः। तृतीयान्तपुत्रशब्देन सहेत्यव्ययस्य व्यधिकरणबहुव्रीहिः। अत्र सूत्रे तुल्ययोगवचनं प्रायिकम्। अतः सकर्मकः, सकामः, सहेतुक इत्यादावपि समासः सिद्ध्यति।

उपर्युपस्थापितो बहुव्रीहिसमाससिद्धान्त एवात्र सैद्धान्तिकपर्याधारत्वेनाश्रितः।

## विषयविश्लेषणम्

उपर्युपस्थापितसैद्धान्तिकपर्याधारमाधृत्यात्र बहुव्रीहिसमासपरिचयपूर्वकं तत्प्रकारविषयकमतभेदविश्लेषणं क्रियते।

**बहुव्रीहिसमासपरिचयः**

बहुव्रीहिसमासपरिचयक्रमे हि- 'अन्यपदार्थप्रधानो बहुव्रीहिः' (पतञ्जलिः, २०२०, पृ. ५७०) इत्युच्यते। बहुव्रीहेर्बहून्युदाहरणान्यन्यपदार्थप्रधानानि भवन्ति। यथा- दृष्टः सागरो येन सः = दृष्टसागरः पुरुषविशेषो देवदत्तादिः। अत्र दृष्टशब्दः सागरशब्दश्चेति द्वावपि समासावयवौ। समासानन्तरञ्च तौ स्वं स्वमर्थं विहाय तथाविधं कञ्चित् पुरुषविशेषं बोधयतः, यः कदाचित् सागरं दृष्टवान्। एवमेव- उपहृतः पशुः यस्मै सः = उपहृतपशू रुद्रः, उद्धृतमोदनं यस्याः सा = उद्धृतौदना स्थाली, पीतान्यम्बराणि यस्य सः = पीताम्बरो हरिरित्यादावपि समासावयवाः शब्दाः स्वं स्वमर्थं त्यक्त्वाऽन्येषामेव पदानामर्थान् बोधयन्ति। किन्तु यत्र यत्रान्यपदार्थप्रधानत्वं तत्र तत्र बहुव्रीहित्वमित्युच्यते चेद्दुष्टं तल्लक्षणं भविष्यति, अव्याप्त्यतिव्याप्तिदोषयुक्तत्वात्तस्य। तत्कथमिति चर्च्यतेऽत्र-

***अन्यपदार्थप्राधान्याभावेऽपि बहुव्रीहिः***

अन्यपदार्थप्राधान्याभावेऽपि कुत्रचिद् बहुव्रीहिसमासो दृश्यते। द्वौ वा त्रयो वा = द्वित्राः, त्रयो वा चत्वारो वा = त्रिचतुरा इत्यादौ विकल्पः। 'द्वित्राः छात्राः समुपस्थिताः' इत्युच्यते चेत् तत्र द्वौ छात्रावपि समुपस्थितौ भवितुं शक्नुतः, त्रयः छात्रा अपि। द्विरावृत्ता दश = द्विदशा इत्यादौ चाऽऽवृत्तिः समासार्थः। एवमेव- दशानां समीपे ये सन्ति = उपदशा इत्यादौ दशसमीपवर्तिनो नव, एकादश वा इत्यर्थः। अत्र अन्यपदार्थवृत्तित्वाऽभावादप्रथमान्तत्वाच्च 'अनेकमन्यपदार्थे' इत्यप्राप्ते 'संख्ययाऽव्ययासन्नादूराधिकसंख्याः संख्येये' (अष्टा. २।२।२५) इति सूत्रमारब्धं पाणिनिना। एवम्- उपविंशाः, आसन्नदशाः, अदूरविंशा इत्यादापि ज्ञेयम्। कर्मव्यतिहारेऽर्थेऽपि बहुव्रीहिर्दृश्यते। यथा- केशेषु केशेषु गृहीत्वेदं युद्धं प्रवृत्तं केशाकेशि। दण्डैर्दण्डैश्च प्रहृत्येदं युद्धं प्रवृत्तं दण्डादण्डि इत्यादि। अतः- अन्यपदार्थप्रधानत्वं बहुव्रीहेर्लक्षणमित्युच्यते चेत्तल्लक्षणमुक्तोदाहरणेष्वव्याप्तं भवति।

***अन्यपदार्थप्राधान्येऽपि न बहुव्रीहिः***

अन्यपदार्थप्राधान्येऽपि कुत्रचिद् बहुव्रीहिसमासो न भवति, अव्ययीभावे तत्पुरुषे च कुत्रचिदन्यपदार्थप्राधान्यदर्शनात्। तदत्र चर्च्यते-

**अव्ययीभावस्याप्यन्यपदार्थप्रधानत्वम् :** कुत्रचिद् अव्ययीभावस्याप्यन्यपदार्थप्रधानत्वं दृश्यते। **'तिष्ठद्गुप्रभृतीनि च'** (अष्टा. २।१।१७) इति सूत्रेण हि तिष्ठद्गुप्रभृतीनामव्ययीभावसमासो विधीयते, निपातनात् साधुत्वञ्च विधीयते। तिष्ठन्ति गावो यस्मिन् काले दोहनाय स तिष्ठद्गु = दोहनकालः। एवम्- वहन्ति गावो यस्मिन् काले स वहद्गु कालविशेषः। आयत्यो गावो यस्मिन् काले = आयतीगवम् = गोष्ठाद्गवागमनकालः। 'अन्यपदार्थे च संज्ञायाम्' (अष्टा. २।१।२१) इत्यनेन सूत्रेण संज्ञायां बोध्यायाम् अन्यपदार्थे विद्यमानं सुबन्तं नदीभिः सह नित्यं समस्यते, स चाव्ययीभावः । उन्मत्ता गंगा यस्मिन् देशे सः = उन्मत्तगङ्गं नाम देशः। लोहिता गंगा यस्मिन् देशे सः = लोहितगङ्गम्। इत्थञ्चाव्ययीभावस्याप्यन्यपदार्थप्रधानत्वं कुत्रचिद् दृश्यते। अत एवान्यपदार्थप्रधानो बहुव्रीहिरिति लक्षणमुक्तेष्वव्ययीभावोदाहरणेष्वप्यतिव्याप्तं भवति।

**तत्पुरुषस्याप्यन्यपदार्थप्रधानत्वम् :** कुत्रचित् तत्पुरुषसमासस्याप्यन्यपदार्थप्रधानत्वं दृश्यते। यथा- नास्ति किञ्चन यस्य सः = अकिञ्चनः, नास्ति कुतोऽपि भयं यस्य सः अकुतोभयः, एहि ईडे इति यस्मिन्कर्मणि तद् एहीडम्, एहि स्वागतमिति यस्यां क्रियायां सा एहिस्वागता, जहि जोडं जहि जोडमित्याभीक्ष्ण्येन य आह स जहिजोडः, अश्नीत

पिबत इत्येवं सततं यत्राभिधीयते सा अश्नीतपिबता इत्यादिषु ह्यन्यपदार्थप्रधानत्वं दृश्यते, किन्तु न तानि बहुव्रीहिसमासस्योदाहरणानि। तानि खलु मयूरव्यंसकादयश्च (अष्टा. २।१।७२) इति सूत्रेण साधुत्वेन कर्मधारयतत्पुरुषरूपेण च निपातितानि। अन्यपदार्थप्रधानो बहुव्रीहिरिति लक्षणमुच्यते चेत्- उक्तेषु मयूरव्यंसकादित्वेन सिद्धेषु केषुचित् कर्मधारयतत्पुरुषोदाहरणेष्वप्यतिव्याप्तं भवति।

**बहुव्रीहिसमासलक्षणपरिष्कारः**

पूर्वोक्तानां तत्सदृशानाञ्चाव्ययीभावसमासोदाहरणानां कर्मधारयतत्पुरुषोदाहरणानाञ्च बहुव्रीहित्वभ्रमनिवारणपूर्वकं बहुव्रीहिपरिचयाय 'शेषो बहुव्रीहिः' (अष्टा. २।२।२३), 'अनेकमन्यपदार्थे' (अष्टा. २।२।२४) इत्यादीनां सूत्राणामर्थः सम्यग् ज्ञातव्यो भवति। तत्र 'शेषो बहुव्रीहि'रित्यधिकारसूत्रस्थशेषशब्दस्य 'यत्रान्यः समासो नोक्त' इत्यर्थः। प्रथमायाः शेषशब्दार्थत्वन्तु न, कण्ठेकाल इत्यादावप्रथमान्तानामपि समासस्येष्टत्वात् (शास्त्री, शुक्लश्च, १९६५, पृ. १२७)। एतच्च सैद्धान्तिकपर्याधारे चर्चितम्। 'अनेकमन्यपदार्थे' (अष्टा. २।२।२४) इत्यनेनान्यपदार्थे वर्तमानानामनेकपदानाम्, संख्ययाऽव्ययासन्न०' (अष्टा. २।२।२५) इति सूत्रेण संख्येयेऽर्थेऽव्ययादीनाम्, 'दिङ्नामान्यन्तराले' (अष्टा. २।२।२६) इत्यनेनान्तरालेऽर्थे, 'तत्र तेनेदमिति सरूपे' (अष्टा. २।२।२७) इत्यनेन कर्मव्यतिहारार्थे, 'तेन सहेति तुल्ययोगे' (अष्टा. २।२।२८) इत्यनेन च तुल्ययोगादौ बहुव्रीहिसमासो भवति। द्वित्राः, त्रिचतुराः, द्विदशाः, उपदशाः, केशाकेशि, सपुत्रः सकर्मकः इत्यादीन्युदाहरणानि। इत्थञ्चान्यपदार्थातिरिक्तार्थेष्वपि बहुव्रीहिविधानाद् अन्यपदार्थप्रधानो बहुव्रीहिरिति लक्षणमव्याप्तिग्रस्तं भवति। अत एव तत्र प्रायेणेति पदं संयुज्य लक्षणमुच्यते कैश्चित्। बहुव्रीहिसमासस्य परम्परागतलक्षणमित्थं परिष्कर्तुं शक्यते- अव्ययीभावतत्पुरुषभिन्नत्वे सति प्रायेणान्यपदार्थप्रधानत्वं बहुव्रीहित्वमिति। अधिकारसूत्रलभ्यः सत्यन्तो विशेषणखण्डः, बहुव्रीहिसमासविधायकप्रथमसूत्रलभ्यः 'अन्यपदार्थप्रधानत्वमि'ति विशेष्यखण्डः। 'संख्ययाऽव्ययासन्न०' (अष्टा. २।२।२५) इत्यादिसूत्रोदाहरणानाम् उपदशाः, द्वित्राः, दण्डादण्डि इत्यादीनां समावेशार्थं प्रायेणेति। 'शेषो बहुव्रीहिः' (अष्टा. २।२।२३) इति सूत्राधिकारस्थैः 'अनेकमन्यपदार्थे', संख्ययाऽव्ययासन्न० इत्यादिभिः सूत्रैर्वार्त्तिकैश्च विधीयमानः समास एव बहुव्रीहिः। अतः सर्वविधोदाहरणानां सङ्ग्रहार्थं- येषां पदानां यस्मिन्नर्थेऽव्ययीभावादिसमासो न विहितः, तेषां पदानां तस्मिन्नर्थे 'शेषो बहुव्रीहि'रित्यधिकारस्थसूत्रैर्वार्त्तिकैश्च विहितः समासो बहुव्रीहिरिति लक्षणेन परिचाययितुं शक्यते।

'पदार्थप्रधानसमासलक्षणस्य प्रयोगौचित्यविमर्शः' इति शीर्षके लघ्वनुसन्धानशोधप्रबन्धे तु समासभेदानां लक्षणेषु नूतना दृष्टिः प्रस्तुता दृश्यते, यत्र चैकत्र- 'विशेषणीकरणं बहुवीहिः' (भट्टराईः, २०८०, पृ. ७९) इति। बहुव्रीहिसमासव्युत्पन्नपदानि विशेषणानि भूत्वाऽन्यस्य विशेषतां द्योतयन्ति। यथा- पीताम्बरो हरिः, पीतक्षीरो बालः, दक्षिणपूर्वा दिक्, उपदशा नव एकादश वेत्यादि। इत्थञ्च 'विशेषणीकरणं बहुव्रीहि'रिति लक्षणेऽव्याप्तिदोषो न दृश्यते। अतिव्याप्तिदोषस्तु दृश्यते, कैश्चित् कृत्तद्धितप्रत्ययैरपि विशेषणीकरणसम्भवात्। यथा- पक्वं फलम्, वर्तमानः कालः, पिपठिषुः छात्रः, धीमान् मनुष्यः, कण्टकितो मार्गः, गुणिनः सखाय इत्यादि। अत एव- 'बहुव्रीहिसमासयोग्यपदमेलनेन विशेषणीकरणं बहुव्रीहि'रिति (पृ. ८०) लक्षणान्तरमुक्तं तत्र। बहुव्रीहिसमासलक्षण एव 'बहुव्रीहिसमासयोग्यपदमेलने'त्यादिपदसंयोजनन्त्वनुपयुक्तमिव प्रतिभाति। अत एव- 'शेषो बहुव्रीहि'रित्यधिकारस्थैः

सूत्रैर्वार्त्तिकैश्च समासं विधाय विशेषणीकरणं बहुव्रीहिरिति तल्लक्षणं परिष्कर्तव्यम् । एतदपेक्षया च 'येषां पदानां यस्मिन्नर्थे०' इत्यादि पूर्वोक्तलक्षणमेवोचितं दृश्यते।

**बहुव्रीहिप्रभेदाः**

बहुव्रीहिभेदप्रभेदनिर्धारणात् पूर्वं तद्विषये विदुषां मतान्युपस्थाप्यन्ते-

शब्दशक्तिप्रकाशिकायाः ४५ तमे श्लोके बहुव्रीहिं तद्गुणसंविज्ञानोऽतद्गुणसंविज्ञानश्चेति द्विधा विभज्य पुनः ४७ तमे श्लोके समासोऽयं द्विपद-त्रिपदादिकत्वेन बहुविधो भवतीत्युल्लिखितम् (तर्कालङ्कारः, १९७३ पृ. २५७-२५९)। तत्रत्यं वर्गीकरणं पर्याप्तं वस्तुनिष्ठञ्च न दृश्यते।

प्रतिसंस्कृतायां सिद्धान्तकौमुद्यां 'अनेकमन्यपदार्थे' इति सूत्रेण, तत्सूत्रस्थैः 'अव्ययानां च', 'सप्तम्युपमानपूर्वपदस्योत्तरपद-लोपश्च' इत्यादिवार्त्तिकैश्च विहितस्य बहुव्रीहिसमासस्य नामकरणमपि न कृतम्, प्रभेदा अपि न प्रदर्शिताः, सामान्यविशेषप्रभेदोऽपि न कृतः। अन्यसूत्रविहितस्य समासस्य च- संख्याबहुव्रीहिः, दिगन्तरालबहुव्रीहिः, व्यतिहारबहुव्रीहिः, सहार्थबहुव्रीहिश्चेति चत्वारो भेदाः प्रदर्शिताः (सिग्देलः, २०१५, पृ. २२८-२३३)।

'समासवृत्तिविमर्शः' इति शोधग्रन्थे दृष्टिभेदेन तद्गुणसंविज्ञानोऽतद्गुणसंविज्ञानश्चेति बहुव्रीहेर्द्विधात्वमुक्तम्, प्रमाणरूपेण च चाङ्गुव्याकरणस्य- 'तद्गुणोऽतद्गुणश्चेति बहुव्रीहिर्द्विधा मतः, प्रथमो लम्बकर्णः स्याद् द्वितीयो दृष्टसागरः' (त्रिपाठी, २०४७, पृ. ११८) इति श्लोक उद्धृतः। तत्रैव समानाधिकरण-व्यधिकरणभेदाभ्यामप्यस्य द्विधात्वमुक्त्वा 'पीतमम्बरं यस्यासौ पीताम्बरो हरिरि'त्यादीनां समानाधिकरणबहुव्रीहित्वं, 'शूलं पाणौ यस्य सः = शूलपाणिरि'त्यादीनाञ्च व्यधिकरणबहुव्रीहित्वमुक्तम्। तत्रैव– तद्गुणसंविज्ञानबहुव्रीहिः, अतद्गुणसंविज्ञानबहुव्रीहिः, संख्योत्तरपदबहुव्रीहिः, अन्तरालाभिधेयकबहुव्रीहिः, सरूपोपलक्षितबहुव्रीहिः, सहपूर्वपदबहुव्रीहिश्चेति बहुव्रीहेः षड् भेदाः स्वीकृताः (त्रिपाठी, २०४७, पृ. ११९-१२०)।

भट्टि-काव्यस्य व्याकरण-सन्दर्भ एकम् आलोचनात्मकम् एवम् भाषिकम् अध्ययनम् (भट्टि-काव्य का व्याकरण के संदर्भ मे एक आलोचनात्मक एवं भाषिक-अध्ययन) इति शीर्षके विद्यावारिधिशोधप्रबन्धे बहुव्रीहेः समानाधिकरण-व्यधिकरणभेदाभ्यां द्विधात्वमुक्तम् (शर्मा, १९८८, पृ. ८९-९२)।

'संस्कृत-समासानाम् ऐतिहासिकम् एवं भाषा-वैज्ञानिकम् अध्ययनम्' (संस्कृत समासों का ऐतिहासिक एवं भाषा-वैज्ञानिक अध्ययन) इति शीर्षके विद्यावारिधिशोधप्रबन्धे विभक्त्यर्थे, अर्थाधिक्यार्थे, निषेधात्मकेऽर्थे, अव्ययार्थे, उपमानोपमेयसम्बन्धार्थे, व्यतिहारार्थे च बहुव्रीहिसमासो भवतीत्युक्त्वा षड्धात्वं वर्णितम् (देवी, १९९३, पृ. ६२ - ६५)।

'पाणिनीय-व्याकरणान्तर्गतानां सन्धीनां समासानाञ्च समीक्षात्मकमनुशीलनम्' (पाणिनीय व्याकरणान्तर्गत सन्धि एवं समासों का समीक्षात्मक अनुशीलन) इति शीर्षके विद्यावारिधिशोधप्रबन्धे प्रथमं समानाधिकरणो व्यधिकरणश्चेति द्वौ प्रमुखभेदौ प्रदर्श्य समानाधिकरणस्य द्वितीया-तृतीया-चतुर्थी-पञ्चमी-षष्ठी-सप्तमीसमानाधिकरणेति

षड् भेदाः प्रदर्शिताः, अन्ये भेदास्तु न चर्चिताः। व्यधिकरणबहुवीहेरुदाहरणानि प्रदत्तानि, किन्तु केन सः समासो विधीयत इति नोल्लिखितम् (भट्टः, २०१३, पृ २४५-२४८)।

'समासः' इति ग्रन्थे बहुव्रीहिसमासस्य सामान्य-विशेषभेदेन द्वैविध्यमुक्तम्। तत्र सामान्यबहुव्रीहेः- द्वितीयार्थ-तृतीयार्थ-चतुर्थ्यर्थ-पञ्चम्यर्थ-षष्ठ्यर्थ-सप्तम्यर्थश्चेति षोढात्वमुक्तम्। समानाधिकरण-बहुव्रीहिरेव सामान्यशब्देन तत्र व्यवहृतः। विशेषबहुव्रीहेश्च- व्यधिकरणः, संख्योत्तरपदः, सङ्ख्योभयपदः, सहपूर्वपदः, व्यतिहारलक्षणः, दिगन्तराललक्षणः, नञ्बहुव्रीहिः, प्रादिबहुव्रीहिः, उपमानपूर्वपदश्चेति नवधात्वमुक्तम् (भट्टः, २००६, पृ. ११)। सङ्कलनया च पञ्चदशधा बहुव्रीहिसमासप्रभेदा इति तन्मतं दृश्यते।

'व्याकरणदृष्ट्या हरिकेलिमहाकाव्यस्य समीक्षणम्' इत्यस्मिन् विद्यावारिधिशोधप्रबन्धे द्विपद-बहुपद-नञ्पूर्वपद-सहपूर्वपद- सङ्ख्योत्तरपद-सङ्ख्योभयपद-कर्मव्यतिहारलक्षण-दिगन्तराललक्षण-उपमानपूर्वपद-व्यधिकरणभेदेन बहुव्रीहेर्दशधात्वं स्वीकृतम् (पौडेलः, २०६४, पृ . १७०)। व्यधिकरणस्योल्लेखे समानाधिकरणस्याप्युल्लेख आवश्यक इत्यपि तत्रोल्लिखितम् (पौडेलः, २०६४, पृ. १७०)। हरिकेलिमहाकाव्यगतसमस्तपदसमीक्षणक्रमे च तत्र समानाधिकरणबहुव्रीहेः पृथक् सोदाहरणचर्चां कृत्वा बहुव्रीहिसमासस्यैकादश प्रकारा इत्युक्तम् (पौडेलः, २०६४, पृ . १८६)।

'शब्दकौस्तुभे समासप्रकरणम्-समीक्षात्मकमध्ययनम्' इत्यस्मिन् विद्यावारिधिशोधप्रबन्धे बहुव्रीहिः समानाधिकरणो विशेषश्चेति द्विधा वर्गीकृतः। तत्र समानाधिकरणबहुव्रीहिः द्वितीयार्थ-तृतीयार्थ-चतुर्थ्यर्थ-पञ्चम्यर्थ-षष्ठ्यर्थ-सप्तम्यर्थभेदेन षड्धा, विशेषबहुव्रीहिश्च- व्यधिकरणः, संख्योत्तरपदः, संख्योभयपदः, सहपूर्वपदः, व्यतिहारलक्षणः, दिगन्तराललक्षणः, नञ्बहुव्रीहिः, प्रादिबहुव्रीहिः, उपमानपूर्वपदश्चेति नवधा विभक्तः (रेथी, २००९, पृ. ३०-३२)। तन्मते 'कण्ठे कालो यस्य सः कण्ठेकालः' इत्यादिरलुग्बहुव्रीहिरपि बहुव्रीहिविशेषरूपेणावगन्तुं शक्यते। तदनुसारेण च तन्मते विशेषबहुव्रीहिः दशधा। सामान्य-विशेषबहुव्रीह्योः प्रकाराणां सङ्कलनया च षोडशधा बहुव्रीहिरिति तन्मतं दृश्यते ( रेथी, २००९, पृ ३१-३२ )।

'सन्धि-समास-कारकाणां परिचयः' इत्यस्यामन्तर्जालकपुस्तिकायां द्विपद-बहुपद-व्यधिकरण-विकार-संघात-अभ्यास-विकल्प-सामीप्य-दिगन्तराल-व्यतीहारलक्षण-समसम्बन्ध-लुप्तमध्यमपद-उपमान-क्रियापूर्वपद-नञ्-प्रादिरिति भेदेन बहुव्रीहिसमासः षोडशधा विभक्तो दृश्यते (मुक्तस्वाध्यायपीठम्, २०१९, पृ. ३४)। तत्र द्विपदबहुव्रीहिरपि द्वितीया-तृतीया-चतुर्थी-पञ्चमी-षष्ठी-सप्तमीबहुव्रीहिः, क्रियाविशेषणबहुव्रीहिश्चेति सप्तधा वर्गीकृतः (मुक्तस्वाध्यायपीठम्, २०१९, पृ ३४-३५)। निर्गता शङ्का यस्मिन् कर्मणि तद्यथा भवति तथा = निःशङ्कम् इति च क्रियाविशेषणबहुव्रीह्युदाहरणम्।

कैश्चिद् द्विपद-बहुपद-सङ्ख्योत्तरपदोभयपद-सहपूर्वपद-व्यतिहारलक्षण-दिगन्तराललक्षणभेदात् सप्तधा बहुव्रीहिः (रेग्मी, २०८२, पृ. १०५) इत्युल्लिख्यते।

## बहुव्रीहिसमासविधायकसूत्रवार्त्तिकाधारेण तत्समासवर्गीकरणस्य समीक्षा

उपरि चर्चितानां बहुव्रीहिप्रभेदानां स्वीकार्यत्वं तदैव सम्भवति, यदा तेषां पाणिनीयसूत्रदृष्ट्या वार्त्तिकदृष्ट्या च परीक्षणं कृत्वा तेषां सूत्रवार्त्तिकसम्मतत्वं साध्यते। बहुव्रीहिसमासविधायकसूत्राणि वार्त्तिकानि च सैद्धान्तिकपर्याधाररूपेणोपरिष्टाच्चर्तितानि। अत्र च तैः सूत्रैर्वार्त्तिकैश्च कीदृक्प्रकारकः समासो विधीयत इति वर्णयित्वा पूर्वोक्तप्रभेदानां समीक्षा विधीयते।

'अनेकमन्यपदार्थे' (अष्टा. २।२।२४) इति सूत्रेण- प्राप्तमुदकं यं सः = प्राप्तोदकः (ग्रामः), ऊढो रथोऽनेन = ऊढरथः (अनड्वान्) इत्यादिरूपः समानाधिकरणो बहुव्रीहिसमासो विधीयते (दीक्षितः, २००८, पृ.८७) इति केचित् । धर्मवृत्तिः, दण्डपाणिः, सच्छास्त्रजन्मेत्यादौ व्यधिकरणबहुव्रीहिसमासविधायकस्यान्यसूत्रस्याभावात् तत्राप्यनेनैव समासो विधातव्यः। अतोऽनेन समानाधिकरणो व्यधिकरणश्च बहुव्रीहिः। यथाऽन्येषु सूत्रेषु वार्त्तिकेषु च बहुव्रीहिसमासविधानाय 'संख्ययाऽव्ययासन्नादूराधिकसंख्याः' 'सङ्घातविकारषष्ठ्याश्चे'त्यादिरूपाः विशेषशब्दाः, 'संख्येये', 'अन्तराले', 'तुल्ययोगे' इत्यादरूपा विशेषावस्थाश्च निर्धारिताः सन्ति, न तथा 'अनेकमन्यपदार्थे' इति सूत्रे। अत एवानेन सूत्रेण विधीयमानः समासः साधारणः/सामान्यः। अस्य प्रकरणानुकूलं नाम च साधारण-बहुव्रीहिः/सामान्य-बहुव्रीहिः। अन्यैः सूत्रैर्वार्त्तिकैश्च विधीयमानः समासस्तु विशेषबहुव्रीहिसमासः। 'अव्ययानां च' (पाण्डेयः, १९९७, पृ. २१२) इत्यनेनाव्ययपूर्वपदो बहुव्रीहिसमासो विधीयते। यद्यपि प्रादयोऽप्यव्ययान्येवेति प्रादिबहुव्रीहेरपि अव्ययपूर्वपदत्वं सम्भवम्, तथापि वार्त्तिककारेणैव भिन्नेन वार्त्तिकेन समासविधानात्, विग्रहस्वरूपपार्थक्याच्च द्वयोर्भेदः। अस्तिक्षीरा इत्यादौ अस्तीत्यस्य विभक्तिप्रतिरूपकत्वेन निपातरूपाव्ययत्वात् अस्तिक्षीरादीनामप्यव्ययपूर्वपदबहुव्रीहौ गणना कर्तव्या। 'सप्तम्युपमानपूर्वपदस्योत्तरपदलोपश्च' (पाण्डेयः, १९९७, पृ. २१२) इति वार्त्तिकेन सप्तम्यन्तपूर्वपदस्योपमानपूर्वपदस्य च पदान्तरेण बहुव्रीहिसमासो विधीयते। तत्र सप्तम्यन्तपूर्वपदबहुव्रीहिः कण्ठेकालः उरसिलोमा इत्यादिः। सप्तम्यन्तपूर्वपदबहुव्रीहौ च सप्तम्या अलुग् भवतीति अलुग्बहुव्रीहिरित्यपि नाम कर्तुं शक्येतेति चेन्न, करे स्थितं धनं यस्य सः करधन इत्यादीनामपि वार्त्तिकेनानेन समासविधानात्, तत्रालुगदर्शनाच्च तन्नामप्रयोगानौचित्यात्। उपमानपूर्वपदसमासस्योदाहरणञ्च- उष्ट्रमुखमिव मुखं यस्य सः = उष्ट्रमुख इति। इत्थञ्च– सप्तम्यन्तपूर्वपदः, उपमानबहुव्रीहिश्चेति वार्त्तिकेनानेन विहितौ द्वौ प्रभेदौ दृश्येते। 'सङ्घातविकारषष्ठ्याश्चोत्तरपदलोपश्च' (पाण्डेयः, १९९७, पृ. २१३) इति वार्त्तिकेन विहितौ केशचूड इत्यादिरूपः संघातबहुव्रीहिः, सुवर्णालङ्कार इत्यादिरूपो विकारबहुव्रीहिश्चेति द्वौ प्रभेदौ दृश्येते। 'प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपः' (पाण्डेयः, १९९७, पृ. २१२) इति वार्त्तिकेन प्रपतितं पर्णं यस्मात् सः = प्रपर्णः इत्यादौ प्रादिबहुव्रीहिसमासो विधीयते। 'अव्ययानां च' इति वार्त्तिकविधीयमानात् साधारणाव्ययपूर्वपदात् प्रादिबहुव्रीहेः भिन्नत्वात् वार्त्तिककारेण भिन्नं वार्त्तिकमुक्तम्। 'नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः' (पाण्डेयः, १९९७, पृ. २१२) इति वार्त्तिकेन न विद्यमानः पुत्रो यस्य सः = अपुत्र इत्यादौ नञ्बहुव्रीहिर्विधीयते। 'अस्तिक्षीरादयश्च' (पाण्डेयः १९९७, पृ. २१३) इति वार्त्तिकेन अस्तिक्षीरा इत्यादौ समासो विधीयते। अत्र अस्तीत्यस्य विभक्तिप्रतिरूपकत्वेन निपातरूपाव्ययत्वात् अव्ययपूर्वपदबहुव्रीहौ गणनीयानि एतादृशान्युदाहरणानि। मुक्तस्वाध्यायपीठेनास्य क्रियापूर्वपदबहुव्रीहिरिति नाम कृतम्। अत्र प्रसङ्गे अस्तीत्यस्य क्रियात्वाभावः साधित एव पूर्वम्। अतस्तन्नाम नोचितम्। 'संख्ययाऽव्ययासन्नादूराधिकसंख्याः संख्येये' (अष्टा. २।२।२५) इति सूत्रेण विहितौ सङ्ख्योत्तरपदबहुव्रीहिः, सङ्ख्योभयपदबहुव्रीहिश्चेति द्वौ प्रभेदौ दृश्येते। 'दिङ्नामान्यन्तराले' (२।२।२६) इति सूत्रेण

दिगन्तरालबहुब्रीहिर्विधीयते। 'तत्र तेनेदमिति सरूपे' (अष्टा. २।२।२७) इति सूत्रेण कर्मव्यतिहारबहुब्रीहिर्विधीयते। 'तेन सहेति तुल्ययोगे' (अष्टा. २।२।२८) इति सूत्रेण सहपूर्वपदबहुब्रीहिर्विधीयते। केचनास्यैव नामान्तरं तुल्ययोगबहुव्रीहिरिति कुर्वन्ति। तुल्ययोगाभावेऽपि सकर्मकः सकाम इत्यादौ समासो दृश्यत एवेति तत्र सूत्रे तुल्ययोगवचनं प्रायिकम्। अत एव तुल्ययोगबहुव्रीहिरिति नामकरणं नोचितम्।

उपर्युक्तसूत्रवार्त्तिक-तदर्थसर्वेक्षणाधारेण पूर्वाचार्यकृतानां बहुव्रीहिप्रभेदवर्गीकरणानां समीक्षा क्रियते–

तत्र सोमनाथस्य वर्गीकरणेऽव्ययपूर्वपदादयोऽनेके प्रभेदा नागता इति तद्वर्गीकरणमपर्याप्तम्। विजयप्रसाद-त्रिपाठीत्यस्य वर्गीकरणमपि तथैव। महाबलेश्वरभट्टस्य वर्गीकरणे प्रायोऽधिकाः प्रभेदाः समागताः, किन्तु तत्रापि 'अव्ययानां चे'ति वार्त्तिकेन विधीयमानः नीचैर्मुख इत्यादिरव्ययपूर्वपदः, कण्ठेकाल इत्यादिः सप्तम्यन्तपूर्वपदः, केशचूड इत्यादिः संघातबहुव्रीहिः, सुवर्णालङ्कार इत्यादिर्विकारबहुव्रीहिश्चेति चत्वारः प्रभेदा न समाविष्टाः। लीलानाथपौडेलेन बहुव्रीहिसमासस्य दशप्रभेदेषु द्विपद-बहुपदयोरपि गणना कृता । पदसंख्याऽऽधारेण हि समासो द्विपदो बहुपदो वा भवति। यस्मिन् कस्मिन्नपि प्रभेदे द्विपदत्वं बहुपदत्वञ्च सम्भवम्। अत एव दशप्रभेदेषु द्विपदबहुपदयोः स्वतन्त्रसमावेशो नोचितः। किञ्च तत्राव्ययपूर्वपदः, सप्तम्यन्तपूर्वपदः, संघातबहुव्रीहिः, विकारबहुव्रीहिः प्रादिबहुव्रीहिश्चेति पञ्च प्रभेदा न समाविष्टा इत्यपर्याप्तता तत्र। टी. एस्. रेथीत्यस्य वर्गीकरणेऽव्ययपूर्वपदः, सप्तम्यन्तपूर्वपदः, संघातबहुव्रीहिः, विकारबहुव्रीहिश्चेति चत्वारः प्रभेदा न समाविष्टाः। मुक्तस्वाध्यायपीठोक्तेषु बहुव्रीहेः षोडशप्रभेदेषु मध्ये केषाञ्चित् अन्तर्भावोऽन्यत्र प्रभेदेषु भवितुं शक्नोति। यथा- तत्र षोडशप्रभेदेषु प्रथममेव द्विपदबहुव्रीहिः, बहुपदबहुव्रीहिश्चेति द्वौ प्रभेदौ गणितौ। बहुविधप्रभेदेषु द्विपदबहुपदयोः समावेशो नोचित इति पूर्वमेवोक्तम्। अत एव प्रभेदनिर्धारणेऽन्यप्रभेदैः साकमनयोरुल्लेखोऽसङ्गतः। तत्र षष्ठप्रभेदरूपेण-त्रिरावृत्ता दश त्रिदशा इत्युदाहृत्य अभ्यासबहुव्रीहिः, सप्तमप्रभेदरूपेण च द्वौ वा त्रयो वा = द्वित्राः इत्युदाहृत्य विकल्पबहुव्रीहिः प्रगणितः। एतौ द्वावपि प्रभेदौ संख्योभयपदबहुव्रीहित्वेन गणनीयौ। तत्राष्टमप्रभेदरूपेण उपदशा इत्याद्युदाहृत्य सामीप्यबहुव्रीहिरुपस्थापितः, यश्च संख्योत्तरपदबहुव्रीहित्वेन गणनीयः। तत्रैवैकादशप्रभेदरूपेण पुत्रेण सह वर्तत इति/सह वर्तमानः = सपुत्रः/सहपुत्रः इत्याद्युदाहृत्य समसम्बन्धबहुव्रीहिः प्रगणितः। अस्मिन् नाम्नि न विशेषापत्तिः, किन्त्वस्य विकल्परूपेण सहार्थबहुव्रीहिरिति वक्तुं शक्यते। समासविधायकसूत्रे तुल्ययोगे इति पदं दृष्ट्वा तुल्ययोगबहुव्रीहिरिति नामकरणं तु न कर्तव्यम्, अव्याप्तिदोषग्रस्तत्वात्। सकर्मकः सकाम इत्यादौ तुल्ययोगाभावेऽपि समासविधानात् 'तेन सहेति'सूत्रे तुल्ययोगवचनं प्रायिकम्। अत एवैतत्सूत्रविहितस्य समासस्य नाम सहार्थ इति सहपूर्वपद इति वा वक्तुमुचितम्, बहुभिराचार्यैः (त्रिपाठी, २०४७, पृ. १२०; पौडेलः, २०६४, पृ. १७० ; भट्टः, २००६, पृ. ११ ; रेथी, २००९, पृ ३१) तथैवोक्तत्वात्। तत्र द्वादशप्रभेदरूपेण करे स्थितं धनं यस्य सः = करधनः इत्युदाहृत्य लुप्तमध्यमपदबहुव्रीहिरिति प्रभेदः प्रगणितः, किन्तु केन सूत्रेण वार्त्तिकेन वा समासोऽयं विधीयत इति नोक्तम् (मुक्तस्वाध्यायपीठम्, २०१९, पृ ३७)। एतन्नामकः प्रभेदोऽन्यत्र न दृश्यते। समासश्चायं 'सप्तम्युपमानपूर्वपदस्योत्तरपदलोपश्च' (पाण्डेयः, १९९७, पृ. २१२) इति वार्त्तिकेन विधीयते। अतः कण्ठेकाल इत्यस्येवास्यापि नामकरणमुचितम्। न च कण्ठेकाल इत्यत्र तु सप्तम्या अलुग् जातः, करधन इत्यत्र न तथेति वाच्यम्, लुग्विधायके 'अमूर्धमस्तकात् स्वाङ्गादकामे' इति सूत्रे 'संज्ञायाम्' इत्यनुवृत्तेः कण्ठेकाल इत्यस्य संज्ञात्वेन तत्रालुकः, करधन इत्यस्य चाऽसंज्ञात्वेन तत्र लुकः सम्भवेन स्वरूपभेदसत्त्वात्। इत्थञ्च- मुक्तस्वाध्यायपीठोक्तेषु षोडशप्रभेदेषु द्विपदबहुव्रीहिः, बहुपदबहुव्रीहिः, सामीप्यबहुव्रीहिः, लुप्तमध्यमपदबहुव्रीहिः, क्रियापूर्वपदबहुव्रीहिः,

अभ्यासबहुव्रीहिः, विकल्पबहुव्रीहिः, समसम्बन्धबहुव्रीहिश्चेति प्रभेदनामानि चिन्त्यानि। भोलानारायणरेग्मीत्यस्य वर्गीकरणे द्विपद-बहुपदबहुव्रीह्योरपि सङ्ख्योत्तरपद-व्यतिहारलक्षणादिभिः साकं गणनम्, अव्ययपूर्वपदादीनां बहूनां प्रभेदानामनुल्लेखनञ्चेति दोषद्वैविध्यं दृश्यते।

इत्थञ्चोपर्युक्तानां विदुषामनुसन्धातॄणाञ्च मध्ये कस्यापि मतं यथावद् ग्राह्यं न दृश्यते। समीक्षाक्रमे ये ये पक्षा आलोचिताः, अस्वीकृताश्च, तान् विहाय सिद्धान्तसम्मतान् पक्षान् समावेश्य च बहुव्रीहेर्भेदप्रभेदनिर्धारणं कर्तव्यं भवति।

**ज्ञापकसिद्धो व्यधिकरणबहुव्रीहिः**

बहुव्रीहिप्रभेदगणनाप्रसङ्गे व्यधिकरणबहुव्रीहेरपि चर्चा कर्तव्या भवति। प्राप्तोदकः, पीताम्बर इत्यादीनि समानाधिकरण-बहुव्रीहेरुदाहरणानि। कण्ठे कालो यस्य सः = कण्ठेकालः, चक्रं पाणौ यस्य सः = चक्रपाणिः, इन्दुः शेखरे यस्य सः = इन्दुशेखरः, पद्मं नाभौ यस्य सः = पद्मनाभः, चन्द्रः शेखरे यस्य सः = चन्द्रशेखरः, धर्मे बुद्धिर्यस्य सः धर्मबुद्धिः, कण्ठे हारो मस्य सः = कण्ठहार इत्यादीनि व्यधिकरणबहुव्रीहेरुदाहरणानि। शिष्टप्रयोगसिद्धत्वाच्चैतेषां साधुत्वमेव। समानाधिकरणबहुव्रीहिसमासस्तु विविधैः सूत्रैर्वार्त्तिकैश्च विधीयते, किन्तु व्यधिकरणबहुव्रीहिसमासः केन सूत्रेण विधीयत इति समस्यास्ति। सामान्यतया 'अनेकमन्यपदार्थे' (अष्टा. २।२।२४) इत्यनेन सूत्रेण समानाधिकरणानां व्यधिकरणानाञ्च समासः सम्भव इति दृश्यते। विजयप्रसादोऽपि- " 'अनेकमन्यपदार्थे' इति सूत्रेणान्यपदार्थे वर्तमानमनेकं सुबन्तं समस्यते, तत्र समानाधिकरण-व्यधिकरणभेदौ दृश्येते" इत्युक्त्वा द्वयोरुदाहरणानि च दत्त्वा तदेव प्रतिपादयति (त्रिपाठी, २०४७, पृ . १२०)। यद्यपि कौमुदीकारमते तेन सूत्रेण समानाधिकरणानामेव बहुव्रीहिसमासः (दीक्षितः, २००८, पृ. ८७), भाष्यकारेणापि 'अनेकमन्यपदार्थे' इति सूत्रे "बहुव्रीहिः समानाधिकरणानाम्" (पतञ्जलिः, २०२०, पृ. ७१०) इत्युक्तम्, तथापि सिद्धस्य गतिश्चिन्तनीया भवतीति शिष्टप्रयोगसामर्थ्यात् सूत्रवार्त्तिकाद्यन्तराभावाच्च 'अनेकमन्यपदार्थे' इत्यनेनैव व्यधिकरणानामपि समास इति स्वीकर्तव्यं भवति। कण्ठेकाल इत्यादीनां सप्तम्यन्तपूर्वपदानां समासविधानार्थन्तु 'सप्तम्युपमानपूर्वपदस्योत्तरपदलोपश्च' (पाण्डेयः, १९९७, पृ. २१२) इति वार्त्तिकं पठितं, किन्तु चक्रं पाणौ यस्य सः = चक्रपाणिरित्यादीनां सप्तम्यन्तोत्तरपदानां समासविधानार्थं न किमपि सूत्रादिकं दृश्यते। 'सप्तमीविशेषणे बहुव्रीहौ' (अष्टा.२।२।३५) इति सूत्रे कौमुद्याम्- "अत एव ज्ञापकाद व्यधिकरणपदो बहुव्रीहिः (दीक्षितः, २००८, पृ. ९४) इत्युक्तम्। सूत्रं तत् सप्तम्यन्तस्य पूर्वप्रयोगार्थमारब्धम्। दण्डपाणिरित्यादीनां साधुत्वप्रसङ्गे च सप्तम्यन्तस्य परप्रयोगार्थं 'प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ' (दीक्षितः, २००८, पृ. ९४) इति वार्त्तिकं पठितम्। सति हि समासे पूर्वप्रयोगः परप्रयोगो वेति विचार्यते। अत एव व्यधिकरणानामपि बहुव्रीहिसमासो भवतीति ज्ञापितम्। सूत्रादिकं विनैव 'ज्ञापकात् समासः' इति कथनापेक्षया 'ज्ञापकात् अनेकमन्यपदार्थे इति सूत्रस्य व्यधिकरणेऽपि प्रवृत्ति'रिति कथनस्यौचित्यपूर्णत्वात् तेनैव सूत्रेण व्यधिकरणबहुव्रीहिरपि भवतीति स्वीकरणीयं वैयाकरणैः । व्यधिकरणबहुव्रीहिश्च कण्ठे कालो यस्य सः कण्ठेकाल इत्यादिः सप्तम्यन्तपूर्वपदः, दण्डः पाणौ यस्य सः दण्डपाणिरित्यादिः सप्तम्यन्तोत्तरपदः, सच्छास्त्राज्जन्म यस्य सः सच्छास्त्रजन्मेत्यादिः पञ्चम्यन्तपूर्वपदश्चेत्यादिरूपोऽनेकधा।

## वर्तिपदार्थान्वयाधारेण बहुव्रीहिभेदौ

वर्तिपदार्थान्वयाधारेण तद्गुणसंविज्ञानाऽतद्गुणसंविज्ञानाविति बहुव्रीहेर्द्विधात्वं दृश्यते। अत एव बहुव्रीहिभेदगणनायां तयोरपि चर्चाऽऽवश्यकी, यद्यपि प्रथमद्वितीययोर्भेदयोरन्तर्भावसम्भवादेनयोः पृथग् गणना नावश्यकी। सामान्यतया बहुव्रीहिरन्यपदार्थप्रधानो भवतीति समासघटशब्दानामर्थबोधो न स्यादित्याशङ्कायामयं विषयो महाभाष्यादावागतोऽस्ति। 'सर्वादीनि सर्वनामानि' (अष्टा. १।१।२७) इति सूत्रे भाष्ये हि सर्वादीनीति पदे बहुव्रीहिसमासस्य सत्त्वाद् बहुव्रीहेश्चान्यपदार्थत्वात् सर्वशब्दस्य सर्वनामसंज्ञा न प्राप्नोतीत्याशङ्क्य, "भवति हि बहुव्रीहौ तद्गुणसंविज्ञानमपि" (पतञ्जलिः, १९९९, पृ. ३१९) इत्युक्तम्। 'अनेकमन्यपदार्थे' (अष्टा. २।२।२४) इत्यत्र भाष्येऽप्युक्तम्- "भवति बहुव्रीहौ तद्गुणसंविज्ञानमपि। तद्यथा- शुक्लवाससमानय, लोहितोष्णीषा ऋत्विजः प्रचरन्तीति तद्गुण आनीयते, तद्गुणाश्च प्रचरन्ति" (पतञ्जलिः, २०२०, पृ. ७१८) इति। एतावता तद्गुणसंविज्ञानोऽतद्गुण-संविज्ञानश्च बहुव्रीहिर्भवतीति सिद्ध्यति। वर्गीकरणञ्चेदं दृष्टिभेदेन क्रियत इति मन्यते (त्रिपाठी, २०४७, पृ. ११८)। वर्तिपदार्थे दृष्टिर्गच्छति चेत्तद्गुणसंविज्ञानः, नो चेदतद्गुणसंविज्ञानो बहुव्रीहिः।

तद्गुणसंविज्ञानबहुव्रीहिः क इत्यत्र 'सर्वादीनि सर्वनामानि' इति सूत्रव्याख्यायां बालमनोरमायामुक्तम्- "तस्य = अन्यपदार्थस्य, गुणाः = विशेषणानि वर्तिपदार्थरूपाणि, तेषां संविज्ञानं = क्रियान्वयितया विज्ञानं यत्र स तद्गुणसंविज्ञान इति। यत्र संयोगसमवायान्यतरसम्बन्धेनान्यपदार्थे वर्तिपदार्थान्वयस्तत्र प्रायेण तद्गुणसंविज्ञानो बहुव्रीहिः। न तद्गुणसंविज्ञानः = अतद्गुणसंविज्ञानः। स्वस्वामिभावादिसम्बन्धेनान्यपदार्थे वर्तिपदार्थान्वये त्वतद्गुणसंविज्ञानो बहुव्रीहिः" (पाण्डेयः, १९९६, पृ. २३६) इति। यथा- 'लम्बकर्णमानय' इत्युक्ते यस्य कर्णौ लम्बौ स्तः, स आनीयते। अतस्तत्र तद्गुणसंविज्ञानो बहुव्रीहिः । 'चित्रगुमानय' इत्युक्ते नहि चित्रवर्ण आनीयते, न वा काचिद् गौर्न वा चित्रवर्णयुता गौः, किन्तु तादृशः कश्चन पुरुष एवानीयते, यश्चित्राणां गवां स्वाम्यस्ति। एवमेव 'दृष्टसागरमानय' इत्युक्ते सागरो नाऽऽनीयते, किन्तु तथाविधः कश्चित् पुरुष एवानीयते, यः कदाचित् सागरं दृष्टवान्। अतस्तत्रातद्गुणसंविज्ञानो बहुव्रीहिः।

## कानिचिदुदाहरणानि

| तद्गुणसंविज्ञानबहुव्रीहिः | अतद्गुणसंविज्ञानबहुव्रीहिः |
|---|---|
| पीतम् अम्बरं यस्य सः = पीताम्बरः (हरिः) | पीतं क्षीरं येन सः = पीतक्षीरः (बालः) |
| बहूनि फलानि यस्मिन् सः = बहुफलः (वृक्षः) | दत्तः पशुः यस्मै सः = दत्तपशुः (रुद्रः) |
| नीचैर्मुखं यस्य सः = नीचैर्मुखः, | दृष्टः सागरो येन सः = दृष्टसागरः |
| अस्ति क्षीरं यस्याः सा = अस्तिक्षीरा | चित्रा गावो यस्य सः = चित्रगुः |
| केशानां संघातः चूडा यस्य सः = केशचूडः | दशानां समीपे ये सन्ति ते = उपदशाः |
| सुवर्णविकार आभरणं यस्य सः = सुवर्णाभरणः | सच्छास्त्राज्जन्म यस्य सः = सच्छास्त्रजन्मा |
| दण्डैश्च दण्डैश्च प्रहृत्येदं युद्धं प्रवृत्तम् = दण्डादण्डि | दक्षिणस्याः पूर्वस्याश्च दिशोर्यदन्तरालं तद्= दक्षिणपूर्वा |
| कण्ठे कालो यस्य सः = कण्ठेकालः | प्रपतितानि पर्णानि यस्मात् सः = प्रपर्णः/प्रपतितपर्णः |
| दण्डः पाणौ यस्य सः = दण्डपाणिः | |

## पदसंख्याऽऽधारेण बहुव्रीहिभेदौ

पदसंख्याऽऽधारेण हि बहुव्रीहिसमासस्य द्विपदबहुव्रीहिर्बहुपदबहुव्रीहिश्चेति द्वौ भेदौ दृश्येते। प्राप्तोदकः, पीताम्बरः, उष्ट्रमुखः, दण्डपाणिरित्यादिर्द्विपदबहुव्रीहिः, प्रियाः चित्रा गावो यस्य सः = प्रियचित्रगुः, उपहृत उत्तमः पशुर्यस्मै सः = उपहृतोत्तमपशुः, सच्छास्त्राज्जन्म यस्य सः सच्छास्त्राज्जन्मेत्यादिर्बहुपदबहुव्रीहिः। स्वोचितानि विविधानि विचित्राणि अनन्ताश्चर्याणि नित्यानि निरवद्यानि अपरिमितानि दिव्यानि भूषणानि यस्य सः = स्वोचितविविधविचित्रानन्ताश्चर्यनित्यनिरवद्यापरिमितदिव्यभूषणः (गोयन्दका, २०५०, पृ. ९) इत्यादीनि बहुपदबहुव्रीहेरुदाहरणानि श्रीरामानुजाचार्यकृतगीताभाष्ये प्राशस्त्येन प्राप्यन्ते। द्वितीयार्थादिसाधारणे, अव्ययपूर्वपदादिविशेषे, ज्ञापकसिद्धे व्यधिकरणे, तेषां कस्मिँश्चिदपि प्रभेदे च द्विपदो बहुपदश्चेति द्वावपि भेदौ भवितुं शक्नुत इति पृथगेतयोर्गणनं तु नावश्यकं नोचितञ्च।

## बहुव्रीहेर्निष्कृष्टभेदाः प्रभेदाश्च

उपरि विहितेन विश्लेषणेन बहुव्रीहिसमासस्य- साधारणबहुव्रीहिः, विशेषबहुव्रीहिः, ज्ञापकसिद्धबहुव्रीहिः/व्यधिकरण-बहुव्रीहिश्चेति त्रयो भेदा दृश्यन्ते। तद्गुणसंविज्ञानाऽतद्गुणसंविज्ञानौ तु दृष्टिभेदेन वर्तिपदार्थान्वयाधृतौ भेदौ, तौ च प्रथमद्वितीयतृतीयेष्वन्तर्भवतः। उपरि प्रदत्ते प्रकोष्ठके त्रिविधानामप्युदाहरणान्युभयत्र समाविष्टानि सन्ति। अतस्तयोः पृथग् गणना नावश्यकी। द्विपदबहुपदावपि तथैव। एतेषां त्रयाणां भेदानां प्रभेदाश्चेत्थं वर्गीकृता भवन्ति-

### *क) साधारणः/सामान्यो बहुव्रीहिः*

अयं द्वितीयार्थादिः षड्विधः। यथा-

१. द्वितीयार्थबहुव्रीहिः- प्राप्तम् उदकं यं सः = प्राप्तोदकः (ग्रामः)

२. तृतीयार्थबहुव्रीहिः- पीतं क्षीरं येन सः = पीतक्षीरः (बालः)

३. चतुर्थ्यर्थबहुव्रीहिः- दत्तः पशुर्यस्मै सः = दत्तपशुः (रुद्रः)

४ पञ्चम्यर्थबहुव्रीहिः- उद्धृतं जलं यस्मात् सः = उद्धृतजलः (कूपः)

५. षष्ठ्यर्थबहुव्रीहिः- पीतानि अम्बराणि यस्य सः = पीताम्बरः (हरिः)

६. सप्तम्यर्थबहुव्रीहिः- बहूनि फलानि यस्मिन् सः = बहुफलः (वृक्षः)।

### *ख) विशेषबहुव्रीहिः*

शब्दविशेषनिर्देशपूर्वकमर्थविशेषनिर्देशपूर्वकं वा विहितो विशेषबहुव्रीहिः। अयञ्चाव्ययपूर्वपदादिरेकादश। यथा-

१. अव्ययपूर्वपदबहुव्रीहिः- नीचैर्मुखं यस्य सः नीचैर्मुखः, अस्ति क्षीरं यस्याः सा अस्तिक्षीरा

२. उपमानबहुव्रीहिः- उष्ट्रमुखमिव (उष्ट्रस्य मुखमिव) मुखं यस्य सः = उष्ट्रमुखः

३. संघातबहुव्रीहिः- केशानां संघातः चूडा यस्य सः = केशचूडः

४. विकारबहुव्रीहिः- सुवर्णविकार आभरणं यस्य सः = सुवर्णाभरणः

५. प्रादिबहुव्रीहिः- प्रपतितानि पर्णानि यस्मात् सः = प्रपर्णः/प्रपतितपर्णः

६. नञ्बहुव्रीहिः- न विद्यमानः पुत्रो यस्य सः = अपुत्रः

७. संख्योत्तरपदबहुव्रीहिः- दशानां समीपे ये सन्ति ते = उपदशाः

८. संख्योभयपदबहुव्रीहिः- द्वौ वा त्रयो वा = द्वित्राः

९. दिगन्तरालबहुव्रीहिः- दक्षिणस्याः पूर्वस्याश्च दिशोर्यदन्तरालं तद् = दक्षिणपूर्वा

१०. कर्मव्यतिहारबहुव्रीहिः- केशेषु केशेषु गृहीत्वा इदं युद्धं प्रवृत्तम् = केशाकेशि, दण्डैश्च दण्डैश्च प्रहृत्येदं युद्धं प्रवृत्तम् = दण्डादण्डि

११. सहार्थबहुव्रीहिः - पुत्रेण सह वर्तत इति/सह वर्तमानः। सपुत्रः / सहपुत्रः, कामेन सह वर्तमानः = सकामः।

***ग) ज्ञापकसिद्धबहुव्रीहिः***

पूर्वप्रयोगव्यवस्थारूपाचार्यप्रवृत्तिज्ञापितो व्यधिकरणबहुव्रीहिः

अस्य त्रिविधाः प्रयोगाः प्राप्यन्ते। यथा-

१. सप्तम्यन्तपूर्वपदः – कण्ठे कालो यस्य सः = कण्ठेकालः

२. सप्तम्यन्तोत्तरपदः – दण्डः पाणौ यस्य सः = दण्डपाणिः

३. पञ्चम्यन्तपूर्वपदः – सच्छास्त्राज्जन्म यस्य सः = सच्छास्त्रजन्मा।

## बहुव्रीहेर्वैकल्पिकं वर्गीकरणम्

बहुव्रीहिसमासस्य पूर्वोक्तं वर्गीकरणं पूर्वानुसन्धातृकृतवर्गीकरणस्य परिष्काररूपम्। तत्र व्यधिकरणबहुव्रीहिरूपेण ज्ञापकसिद्धो व्यधिकरणबहुव्रीहिरेवोल्लिखितः। वस्तुतो यत्र विग्रहे पूर्वपदम् उत्तरपदञ्च समानविभक्तियुतं न भवति, तत्रैव वैयधिकरण्यं भवति। तच्च विशेषबहुव्रीहिप्रभेदेष्वपि कुत्रचित् प्राप्यते। अत एव बहुव्रीहिसमासस्य वर्गीकरणमित्थमपि कर्तुं शक्यते- बहुव्रीहिः साधारणः विशेषश्चेति द्विविधः। स च घटकपदोत्तरविभक्त्याधारेण समानाधिकरणो व्यधिकरणश्चेति द्विविधः। तत्र साधारणस्य विशेषस्य च प्रभेदेषु समानाधिकरणो व्यधिकरणो वा बहुव्रीहिर्भवितुं शक्नोति। यथा- साधारणस्य प्रभेदेषु मध्ये षष्ठ्यर्थबहुव्रीहिर्द्विविधः- समानाधिकरणो व्यधिकरणश्च। पीताम्बरो हरिरित्यादिः समानाधिकरणः। व्यधिकरणस्तु- कण्ठेकाल इत्यादिः सप्तम्यन्तपूर्वपदः, दण्डपाणिरित्यादिः सप्तम्यन्तोत्तरपदः, सच्छास्त्रजन्मेत्यादिः पञ्चम्यन्तपूर्वपदश्चेति त्रिविधः। विशेषबहुव्रीहि-प्रभेदेषु मध्ये च- उपमान-प्रादि-नञ्-अस्तिक्षीरादि-संख्योभयपद-दिगन्तराल-कर्मव्यतिहारबहुव्रीहयः समानाधिकरणाः, अव्ययपूर्वपद-संघात-विकार-संख्योत्तरपद-सहार्थबहुव्रीहयो व्यधिकरणाः। तत्र सामानाधिकरण्यं वैयधिकरण्यञ्च विग्रहादेवावगम्यते। वर्तिपदार्थान्वयाधारेण पदसंख्याधारेण च कृतं वर्गीकरणन्तु पूर्वोक्तमेवोचितम्।

## बहुव्रीहिसमासपरिचयस्य तद्भेदप्रभेदानाञ्च मूल्यम्

कस्मिँश्चिदपि समस्तशब्दे कः समासोऽस्तीत्याधारेणैव तदर्थो निर्धार्यते। यथा- रामेश्वरशब्दे षष्ठीतत्पुरुषः, कर्मधारयो बहुव्रीहिर्वा भवितुं शक्नोति। रामस्येश्वर इत्युक्ते षष्ठीतत्पुरुषः, रामश्चासावेश्वर इत्युक्ते कर्मधारयः, राम ईश्वरो यस्येत्युक्ते बहुव्रीहिः। सामान्यतया विग्रहेण समासप्रकारो भिद्यते, किन्तु कुत्रचिद् अन्यथापि दृश्यते। तिष्ठन्ति गावो यस्मिन् काले = तिष्ठद्गु इत्यत्र विग्रहस्तु बहुव्रीहाविवास्ति, किन्त्वयमव्ययीभावस्योदाहरणम्। 'अन्यपदार्थप्रधानो बहुव्रीहि'रित्युच्यते, किन्तु कुत्रचिदव्ययीभावादावप्यन्यपदार्प्रधानत्वं घटते चेत् कुत्रचिद् बहुव्रीहावपि तन्न घटते। अत एव बहुव्रीहिसमासस्य निर्दुष्टपरिचयान्वेषणमावश्यकमासीत्। बहुव्रीहिसमासभेदप्रभेदविषयेऽपि विदुषां मतैक्यं नास्ति।

तद्विषयेऽपि वस्तुनिष्ठाध्ययनविश्लेषणयोरावश्यकतामनुभूय तत्प्रयत्नोऽत्र लेखे कृतोऽस्ति। अत्र हि बहुव्रीहिसमासस्य सलक्षणपरिचयप्रदानपुरःसरं तद्भेदप्रभेदविषयकं वस्तुनिष्ठमध्ययनं विश्लेषणञ्च कृतमस्ति। अनेनाध्ययनेन बहुव्रीहिसमासपरिचय-तद्भेदप्रभेदविषयकजिज्ञासा समाहिता भविष्यतीति विश्वस्यते। बहुव्रीहिसमासं सम्यक्तया परिचेतुं तद्भेदप्रभेदविषयकज्ञानमप्यावश्यकं भवति। अत एव समासप्रकरणे बहुव्रीहिसमासपरिचयस्य तद्भेदप्रभेदानाञ्च मूल्यं महत्त्वञ्चोच्चतरं भवति। अत्र प्रस्तुतेन बहुव्रीहिपरिचयेन तद्भेदप्रभेदवर्गीकरणेन च तत्पुरुषाव्ययीभाव-व्यतिरिक्तसमासत्वेन बहुव्रीहिसमासं परिचेतुं सहयोगो भविष्यति। बहुव्रीहिसमासस्य निर्दुष्टपरिचयान्वेषणं तस्य सिद्धान्तसम्मतभेदप्रभेदनिर्धारणञ्चास्याध्ययनस्य मूल्यम्। अनेनाध्यनेन बहुव्रीहिसमासपरिचय-तद्भेदप्रभेदविषयकजिज्ञासवः पाठका लाभान्विता भविष्यन्ति।

## निष्कर्षः

व्याकरणे शब्दव्युत्पत्तिप्रक्रियास्वेका समासप्रक्रिया। समासभेदेष्वन्यतमो बहुव्रीहिः। तत्र बहुव्रीहिसमासस्य परिचयः कः ? बहुव्रीहिसमासस्य भेदाः प्रभेदाश्च कति सन्ति ? इति समस्याद्वयमादाय बहुव्रीहिसमासपरिचयपूर्वकं तद्भेदनिर्धारणोद्देश्येनायं शोधलेखो निर्मितः। लेखश्चायं गुणात्मकस्वरूपे संरचितः। अत्र व्याकरणग्रन्थादिभ्यो बहुव्रीहिसमाससम्बद्धास्तत्प्रभेदसम्बद्धाश्च तथ्यरूपाः सामग्र्यो गृहीताः। तासां वर्णनं विश्लेषणञ्च कृत्वैतादृशः निष्कर्षः प्राप्तः– 'शेषो बहुव्रीहिरिति सूत्राधिकारस्थैः 'अनेकमन्यपदार्थे' इत्यादिभिः सूत्रैर्वार्त्तिकैश्च विधीयमानः समास एव बहुव्रीहिः। अव्ययीभावतत्पुरुषभिन्नत्वे सति प्रायेणान्यपदार्थप्रधानत्वं बहुव्रीहित्वम् इति बहुव्रीहिसमासलक्षणम्। अथवा- येषां पदानां यस्मिन्नर्थेऽव्ययीभावादिसमासो न विहितः, तेषां पदानां तस्मिन्नर्थे 'शेषो बहुव्रीहि'रित्यधिकारस्थसूत्रैर्वार्त्तिकैश्च विहितः समासो बहुव्रीहिरिति तल्लक्षणम्। बहुव्रीहिभेदप्रभेदनिर्धारणविषये विदुषां मतान्यनेकानि भिन्नानि च दृश्यन्ते। बहुव्रीहिसमासविधायकसूत्रवार्त्तिकाधारेण तेषां मतानां समीक्षणेन, संश्लेषणेन, विश्लेषणेन च- बहुव्रीहिसमासस्य साधारणः/सामान्यो बहुव्रीहिः, विशेषबहुव्रीहिः, ज्ञापकसिद्धो व्यधिकरणबहुव्रीहिश्चेति त्रयो भेदाः दृश्यन्ते। तत्रापि साधारणस्य सामान्यस्य वा- द्वितीयार्थबहुव्रीहिः, तृतीयार्थबहुव्रीहिः, चतुर्थ्यर्थबहुव्रीहिः, पञ्चम्यर्थबहुव्रीहिः, षष्ठ्यर्थबहुव्रीहिः, सप्तम्यर्थबहुव्रीहिश्चेति षड् प्रभेदाः। विशेषबहुव्रीहेश्च - अव्ययपूर्वपदबहुव्रीहिः, उपमानबहुव्रीहिः, संघातबहुव्रीहिः, विकारबहुव्रीहिः, प्रादिबहुव्रीहिः, नञ्बहुव्रीहिः, संख्योत्तरपदबहुव्रीहिः, संख्योभयपदबहुव्रीहिः, दिगन्तरालबहुव्रीहिः, कर्मव्यतिहारबहुव्रीहिः, सहार्थबहुव्रीहिश्चेत्येकादश प्रभेदाः। ज्ञापकसिद्धस्य व्यधिकरणबहुव्रीहेश्च सप्तम्यन्तपूर्वपदः, सप्तम्यन्तोत्तरपदः, पञ्चम्यन्तपूर्वपदश्चेति त्रयः प्रभेदाः प्रचलिताः दृश्यन्ते। अथवा- साधारणः विशेषश्चेति बहुव्रीहिर्द्विविधः। साधारणान्तर्गतः षष्ठ्यर्थबहुव्रीहिः समानाधिकरणो व्यधिकरणश्चेति द्विविधः। विशेषबहुव्रीहिप्रभेदेषु- उपमान-प्रादि-नञ्-अस्तिक्षीरादि-संख्योभयपद-दिगन्तराल-कर्मव्यतिहारबहुव्रीहयः समानाधिकरणाः, अव्ययपूर्वपद-संघात-विकार-संख्योत्तरपद-सहार्थबहुव्रीहयो व्यधिकरणाः। वर्तिपदार्थान्वयाधारेण च तद्गुणसंविज्ञानः, अतद्गुणसंविज्ञानश्चेति बहुव्रीहेर्द्वौ भेदौ, पदसंख्याधारेण च द्विपदः बहुपदश्चेति तस्य द्वौ भेदौ दृश्येते ।

अन्त्ये च - अनेनाध्यनेन बहुव्रीहिसमास-तद्भेदप्रभेदविषयकजिज्ञासवः पाठका लाभान्विता भविष्यन्तीति विश्वस्यते।

**कृतज्ञताज्ञापनम्**

शोधलेखोऽयं मम विद्यावारिध्यनुसन्धानेन सम्बद्धोऽस्ति। तदनुसन्धनाय मह्यमनुसन्धानसहयोगसहितं विद्वद्वृत्तिं (PhD-81/82-H&S-14) प्रदाय महतीं सहायतां कृतवते नेपालस्थाय विश्वविद्यालयानुदानाऽऽयोगाय, प्रस्तुतालेखनिर्माणक्रमे येषां मुनीनां, वैयाकरणानां, पूर्ववर्त्त्यनुसन्धातॄणां विदुषाञ्च विचारा गृहीतास्तेभ्यः पूर्वजेभ्यः, लेखस्यास्य प्राविधिकदृष्ट्या, विषयप्रतिपादनदृष्ट्या, भाषिकदृष्ट्या च परीक्षणं विधाय परिष्काराय परामर्शं प्रदाय महदुपकारं कृतवद्भ्यो विज्ञगुरुजनेभ्यः, अन्येभ्यः सहयोगिभ्यश्च सश्रद्धं सधन्यवादञ्च कृतज्ञतामुपहरामि।

**सन्दर्भसामग्रीसूची**

**मुद्रितसन्दर्भसामग्रीसूची**

आचार्यः, हरिप्रसादः (२०६०) (व्या.), *अष्टाध्यायी* (शारदाप्रभाव्याख्यामहिता), महेन्द्रसंस्कृतविश्वविद्यालयः।

गोयन्दका, हरिकृष्णदास (२०५०) (व्या.), *श्रीमद्भगवद्गीता श्रीरामानुजभाष्य*, हिन्दी अनुवादसहित, गीताप्रेस।

तर्कालङ्कारः, जगदीशः (ई. १९७३), *शब्दशक्तिप्रकाशिका*, सम्पा.- ढुण्ढिराज-शास्त्री, चौखम्बा संस्कृत सीरीज अफिस।

त्रिपाठी, विजयप्रसादः (२०४७), *समासवृत्तिविमर्शः*, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः।

दीक्षितः, भट्टोजिः (ई. २००८), *वैयाकरणसिद्धान्तकौमुदी* (मूलमात्रम्, पु.मु.सं.), सम्पा. गोपालदत्तपाण्डेयः, चौखम्बा विद्याभवन।

पतञ्जलिः (२०२०), *व्याकरणमहाभाष्यम्*, द्वितीयो भागः, हरयाणा साहित्य संस्थान।

पतञ्जलिः (१९९९), *व्याकरणमहाभाष्यम् (पुमुसं)*, प्रथमो भागः, सम्पा.- नन्दकिशोरशास्त्री, प्रतिभा प्रकाशन।

पाण्डेयः, गोपालदत्तः (ई. १९९७), (सम्पा.), *वैयाकरणसिद्धान्तकौमुदी (*भट्टोजिदीक्षितविरचिता*)*, वासुदेवदीक्षितप्रणीतया बालमनोरमाव्याख्यया दीपिकाख्यहिन्दीव्याख्यया च समलङ्कृता, (तृ. संस्क.), समासादि-द्विरुक्तान्त-द्वितीयो भागः, चौखम्बा सुरभारती प्रकाशन।

पाण्डेयः, गोपालदत्तः (ई. १९९६), (सम्पा.), *वैयाकरणसिद्धान्तकौमुदी (*भट्टोजिदीक्षितविरचिता*)*, वासुदेवदीक्षितप्रणीतया बालमनोरमाव्याख्यया दीपिकाख्यहिन्दीव्याख्यया च समलङ्कृता, (चतु. संस्क.), कारकान्तः प्रथमो भागः, चौखम्बा सुरभारती प्रकाशन।

पौडेलः, लीलानाथः (२०६४), *व्याकरणदृष्ट्या हरिकेलिमहाकाव्यस्य समीक्षणम्* [अप्रकाशितो विद्यावारिधिशोधप्रबन्धः], नेपालसंस्कृतविश्वविद्यालयः।

शास्त्री, द्वारिकाप्रसादः, शुक्लः, कालिकाप्रसादः (ई. १९६५) (सम्पा. ) *काशिकावृत्तिः*, न्यास-पदमञ्जरीभ्यां युता (द्वितीयो भागः), प्राच्यभारतीप्रकाशनम्।

सिग्देलः, सोमनाथः (२०१५), (प्रतिसंस्कर्ता), *प्रतिसंस्कृता सिद्धान्तकौमुदी*, भट्टोजिदीक्षितकृतिः, विशेष-विवृत्तिसहिता, नेपालएकेडमी।

**वैद्युतसन्दर्भसामग्रीसूची**

देवी, शकुन्तला ( ई. १९९३), *संस्कृत समासों का ऐतिहासिक एवं भाषा-वैज्ञानिक अध्ययन* [विद्यावारिधि- शोध-प्रबन्धः, महर्षि-दयानन्द-विश्वविद्यालयः] shodhganga. http://hdl.handle.net/10603/116907

भट्टः, जि. महाबलेश्वरः (ई.२००६), *समासः*, संस्कृतभारती । achive.org. https://archive.org/details/wg1235

भट्टः, सतीशचन्द्रः(ई. २०१३), *पाणिनीय व्याकरणान्तर्गत सन्धि एवं समासों का समीक्षात्मक अनुशीलन* (विद्यावारिधिशोधप्रबन्धः, बीर बहादुर सिंह पूर्वाञ्चल विश्वविद्यालय)। shodhganga. https://shodhganga.inflibnet.ac.in/handle/10603/179618

भट्टराईः, भवानीशङ्करः (२०८०), *पदार्थप्रधानसमासलक्षणस्य प्रयोगौचित्यविमर्शः*, (लघ्वनुसन्धानशोधप्रबन्धः) अनुसन्धान-व्यवस्थापन-प्रभागः(एकाइ), पिण्डेश्वरविद्यापीठम् । ResearchGate. DOI: 10.13140/RG.2.2.10009.12643

मुक्तस्वाध्यायपीठम् (ई.२०१९), *सन्धि-समास-कारकाणां परिचयः* (खण्डः-२ समासः)। https://sanskrit.nic.in/msp/upload/digitized_slm_pdf/Shastri_Bridge/SB_03_samas.pdf

रेग्मी, भोलानारायणः (२०८२), समासविधिविमर्शः, *कालिकाप्रभा* ३, २०८२, ९९ – १०७ । NepJOL. https://doi.org/10.3126/kp.v3i3.84439

रेथी, टी.एस. (ई. २००९), *शब्दकौस्तुभे समासप्रकरणम्-समीक्षात्मकमध्ययनम्* [विद्यावारिधिशोधप्रबन्धः, श्रीशंकराचार्य युनिभसिटी अफ संस्कृत], shodhganga. https://shodhganga.inflibnet.ac.in/handle/10603/136057

शर्मा, शशि बाला (ई. १९८८), *भट्टि-काव्य का व्याकरण के संदर्भ में एक आलोचनात्मक एवं भाषिक-अध्ययन* [विद्यावारिधिशोधप्रबन्धः, संस्कृत, पाली एवं प्राकृत विभाग, महर्षि दयानन्द विश्वविद्यालय] रोहतक। http://hdl.handle.net/10603/113533

Ashtadhyayi.com. (2023). *Ashtadhyayi.com* (Version 1) [Mobile app]. https://play.google.com/store/apps/details?id=com.ashtadhyayi.twa